# Rigveda Mandala 6

# ઋગ્વેદઃ મણ્ડલં ૬

## Document Information

Text title : Rigveda Mandalam 6

File name : r06.itx

Category : veda, rigveda, svara

Location : doc_veda

Author : Vedic Tradition

Transliterated by : 1. Source: Aufrecht/van Nooten/Holland (Samhita), 2. Final transliteration: Detlef Eichler

Proofread by : Detlef Eichler detlefeichler at googlemail.com

Latest update : July 2, 2013

Send corrections to : detlefeichler@googlemail.com, sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

January 21, 2023

*sanskritdocuments.org*

# Rigveda Mandala 6

# ઋગ્વેદઃ મણ્ડલં ૬

ત્વં હ્યગ્ને પ્રથમો મનોતાસ્યા ધિયો અભવો દસ્મ હોતા ।
ત્વં સીં વૃષન્નકૃણોર્દુષ્ટરીતુ સહો વિશ્વસ્મૈ સહસે સહધ્યૈ ॥ ૬.૦૦૧.૦૧
અધા હોતા ન્યસીદો યજીયાનિળસ્પદ ઇષયન્નીડ્યઃ સન્ ।
તં ત્વા નરઃ પ્રથમં દેવયન્તો મહો રાયે ચિતયન્તો અનુ ગ્મન્ ॥ ૬.૦૦૧.૦૨
વૃતેવ યન્તં બહુભિર્વસવ્યૈઉસ્ત્વે રયિં જાગૃવાંસો અનુ ગ્મન્ ।
રુશન્તમગ્નિં દર્શતં બૃહન્તં વપાવન્તં વિશ્વહા દીદિવાંસમ્ ॥ ૬.૦૦૧.૦૩
પદં દેવસ્ય નમસા વ્યન્તઃ શ્રવસ્યવઃ શ્રવ આપન્નમૃક્તમ્ ।
નામાનિ ચિદ્દધિરે યજ્ઞિયાનિ ભદ્રાયાં તે રણયન્ત સંદૃષ્ટૌ ॥ ૬.૦૦૧.૦૪
ત્વાં વર્ધન્તિ ક્ષિતયઃ પૃથિવ્યાં ત્વાં રાય ઉભયાસો જનાનામ્ ।
ત્વં ત્રાતા તરણે ચેત્યો ભૂઃ પિતા માતા સદમિન્માનુષાણામ્ ॥ ૬.૦૦૧.૦૫
સપર્યેણ્યઃ સ પ્રિયો વિક્ષ્વ૧ગ્નિર્હોતા મન્દ્રો નિ ષસાદા યજીયાન્ ।
તં ત્વા વયં દમ આ દીદિવાંસમુપ જ્ઞુબાધો નમસા સદેમ ॥ ૬.૦૦૧.૦૬
તં ત્વા વયં સુધ્યોઉ નવ્યમગ્ને સુમ્નાયવ ઈમહે દેવયન્તઃ ।
ત્વં વિશો અનયો દીદ્યાનો દિવો અગ્ને બૃહતા રોચનેન ॥ ૬.૦૦૧.૦૭
વિશાં કવિં વિશ્પતિં શશ્વતીનાં નિતોશનં વૃષભં ચર્ષણીનામ્ ।
પ્રેતીષણિમિષયન્તં પાવકં રાજન્તમગ્નિં યજતં રયીણામ્ ॥ ૬.૦૦૧.૦૮
સો અગ્ન ઈજે શશમે ચ મર્તો યસ્ત આનટ્ સમિધા હવ્યદાતિમ્ ।
ય આહુતિં પરિ વેદા નમોભિર્વિશ્વેત્સ વામા દધતે ત્વોતઃ ॥ ૬.૦૦૧.૦૯
અસ્મા ઉ તે મહિ મહે વિધેમ નમોભિરગ્ને સમિધોત હવ્યૈઃ ।
વેદી સૂનો સહસો ગીર્ભિરુક્થૈરા તે ભદ્રાયાં સુમતૌ યતેમ ॥ ૬.૦૦૧.૧૦
આ યસ્તતન્થ રોદસી વિ ભાસા શ્રવોભિશ્ચ શ્રવસ્ય૧સ્તરુત્રઃ ।
બૃહદ્ભિર્વાજૈઃ સ્થવિરેભિરસ્મે રેવદ્ભિરગ્ને વિતરં વિ ભાહિ ॥ ૬.૦૦૧.૧૧

નૃવદ્વસો સદમિદ્ધેહ્યસ્મે ભૂરિ તોકાય તનયાય પશ્વઃ ।
પૂર્વીરિષો બૃહતીરારેઅઘા અસ્મે ભદ્રા સૌશ્રવસાનિ સન્તુ ॥ ૬.૦૦૧.૧૨
પુરૂણ્યગ્ને પુરુધા ત્વાયા વસૂનિ રાજન્વસુતા તે અશ્યામ્ ।
પુરૂણિ હિ ત્વે પુરુવાર સન્ત્યગ્ને વસુ વિધતે રાજનિ ત્વે ॥ ૬.૦૦૧.૧૩

ત્વં હિ ક્ષૈતવદ્યશોઽગ્ને મિત્રો ન પત્યસે ।
ત્વં વિચર્ષણે શ્રવો વસો પુષ્ટિં ન પુષ્યસિ ॥ ૬.૦૦૨.૦૧
ત્વાં હિ ષ્મા ચર્ષણયો યજ્ઞેભિર્ગીર્ભિરીળતે ।
ત્વાં વાજી યાત્યવૃકો રજસ્તૂર્વિશ્વચર્ષણિઃ ॥ ૬.૦૦૨.૦૨
સજોષસ્ત્વા દિવો નરો યજ્ઞસ્ય કેતુમિન્ધતે ।
યદ્ધ સ્ય માનુષો જનઃ સુમ્નાયુર્જુહ્વે અધ્વરે ॥ ૬.૦૦૨.૦૩
ઋધદ્યસ્તે સુદાનવે ધિયા મર્તઃ શશમતે ।
ઊતી ષ બૃહતો દિવો દ્વિષો અંહો ન તરતિ ॥ ૬.૦૦૨.૦૪
સમિધા યસ્ત આહુતિં નિશિતિં મર્ત્યો નશત્ ।
વયાવન્તં સ પુષ્યતિ ક્ષયમગ્ને શતાયુષમ્ ॥ ૬.૦૦૨.૦૫
ત્વેષસ્તે ધૂમ ઋણ્વતિ દિવિ ષઞ્છુક્ર આતતઃ ।
સૂરો ન હિ દ્યુતા ત્વં કૃપા પાવક રોચસે ॥ ૬.૦૦૨.૦૬
અધા હિ વિક્ષ્વીડ્યોઽસિ પ્રિયો નો અતિથિઃ ।
રણ્વઃ પુરીવ જૂર્યઃ સૂનુર્ન ત્રયયાય્યઃ ॥ ૬.૦૦૨.૦૭
ક્રત્વા હિ દ્રોણે અજ્યસેઽગ્ને વાજી ન કૃત્વ્યઃ ।
પરિજ્મેવ સ્વધા ગયોઽત્યો ન હ્વાર્યઃ શિશુઃ ॥ ૬.૦૦૨.૦૮
ત્વં ત્યા ચિદચ્યુતાગ્ને પશુર્ન યવસે ।
ધામા હ યત્તે અજર વના વૃશ્ચન્તિ શિક્વસઃ ॥ ૬.૦૦૨.૦૯
વેષિ હ્યધ્વરીયતામગ્ને હોતા દમે વિશામ્ ।
સમૃધો વિશ્પતે કૃણુ જુષસ્વ હવ્યમઙ્ગિરઃ ॥ ૬.૦૦૨.૧૦
અચ્છા નો મિત્રમહો દેવ દેવાનગ્ને વોચઃ સુમતિં રોદસ્યોઃ ।
વીહિ સ્વસ્તિં સુક્ષિતિં દિવો નૄન્દ્વિષો અંહાંસિ દુરિતા તરેમ તા તરેમ તવાવસા તરેમ ॥ ૬.૦૦૨.૧૧

અગ્ને સ ક્ષેષદૃતપા ઋતેજા ઉરુ જ્યોતિર્નશતે દેવયુષ્ટે ।

યં ત્વં મિત્રેણ વરુણઃ સજોષા દેવ પાસિ ત્યજસા મર્તમંહઃ ॥ ૬.૦૦૩.૦૧
ઈજે યજ્ઞેભિઃ શશમે શમીભિરૃધદ્વારાયાગ્નયે દદાશ ।
એવા ચન તં યશસામજુષ્ટિર્નાંહો મર્તં નશતે ન પ્રદૃપ્તિઃ ॥ ૬.૦૦૩.૦૨
સૂરો ન યસ્ય દૃશતિરરેપા ભીમા યદેતિ શુચતસ્ત આ ધીઃ ।
હેષસ્વતઃ શુરુધો નાયમક્તોઃ કુત્રા ચિદ્રણ્વો વસતિર્વનેજાઃ ॥ ૬.૦૦૩.૦૩
તિગ્મં ચિદેમ મહિ વર્પો અસ્ય ભસદશ્વો ન યમસાન આસા ।
વિજેહમાનઃ પરશુર્ન જિહ્વાં દ્રવિર્ન દ્રાવયતિ દારુ ધક્ષત્ ॥ ૬.૦૦૩.૦૪
સ ઇદસ્તેવ પ્રતિ ધાદસિષ્યઞ્છિશીત તેજોઽયસો ન ધારામ્ ।
ચિત્રધ્રજતિરરતિર્યો અક્તોર્વેર્ન દ્રુષદ્વા રઘુપત્મજંહાઃ ॥ ૬.૦૦૩.૦૫
સ ઈં રેભો ન પ્રતિ વસ્ત ઉસ્રાઃ શોચિષા રારપીતિ મિત્રમહાઃ ।
નક્તં ય ઈમરુષો યો દિવા નૄનમર્ત્યો અરુષો યો દિવા નૄન્ ॥ ૬.૦૦૩.૦૬
દિવો ન યસ્ય વિધતો નવીનોદ્વૃષા રુક્ષ ઓષધીષુ નૂનોત્ ।
ઘૃણા ન યો ધ્રજસા પત્મના યન્ના રોદસી વસુના દં સુપત્ની ॥ ૬.૦૦૩.૦૭
ધાયોભિર્વા યો યુજ્યેભિરર્કૈર્વિદ્યુન્ન દવિદ્યોત્સ્વેભિઃ શુષ્મૈઃ ।
શર્ધો વા યો મરુતાં તતક્ષ ઋભુર્ન ત્વેષો રભસાનો અદ્યૌત્ ॥ ૬.૦૦૩.૦૮

યથા હોતર્મનુષો દેવતાતા યજ્ઞેભિઃ સૂનો સહસો યજાસિ ।
એવા નો અદ્ય સમના સમાનાનુશન્નગ્ન ઉશતો યક્ષિ દેવાન્ ॥ ૬.૦૦૪.૦૧
સ નો વિભાવા ચક્ષણિર્ન વસ્તોરગ્નિર્વન્દારુ વેદ્યશ્ચનો ધાત્ ।
વિશ્વાયુર્યો અમૃતો મર્ત્યેષૂષર્ભુદ્ભૂદતિથિર્જાતવેદાઃ ॥ ૬.૦૦૪.૦૨
દ્યાવો ન યસ્ય પનયન્ત્યભ્વં ભાસાંસિ વસ્તે સૂર્યો ન શુક્રઃ ।
વિ ય ઇનોત્યજરઃ પાવકોઽશ્નસ્ય ચિચ્છિશ્નથત્પૂર્વ્યાણિ ॥ ૬.૦૦૪.૦૩
વદ્મા હિ સૂનો અસ્યદ્મસદ્વા ચક્રે અગ્નિર્જનુષાજ્માન્નમ્ ।
સ ત્વં ન ઊર્જસન ઊર્જં ધા રાજેવ જેરવૃકે ક્ષેષ્યન્તઃ ॥ ૬.૦૦૪.૦૪
નિતિક્તિ યો વારણમન્નમત્તિ વાયુર્ન રાષ્ટ્ર્યત્યેત્યક્તૂન્ ।
તુર્યામ યસ્ત આદિશામરાતીરત્યો ન હ્રુતઃ પતતઃ પરિહ્રુત્ ॥ ૬.૦૦૪.૦૫
આ સૂર્યો ન ભાનુમદ્ભિરર્કૈરગ્ને તતન્થ રોદસી વિ ભાસા ।
ચિત્રો નયત્પરિ તમાંસ્યક્તઃ શોચિષા પત્મન્નૌશિજો ન દીયન્ ॥ ૬.૦૦૪.૦૬

ત્વાં હિ મન્દ્રતમમર્કશોકૈર્વવૃમહે મહિ નઃ શ્રોષ્યગ્ને ।
ઇન્દ્રં ન ત્વા શવસા દેવતા વાયું પૃણન્તિ રાધસા નૃતમાઃ ॥ ૬.૦૦૪.૦૭
નૂ નો અગ્નેઽવૃકેભિઃ સ્વસ્તિ વેષિ રાયઃ પથિભિઃ પર્ષ્યંહઃ ।
તા સૂરિભ્યો ગૃણતે રાસિ સુમ્નં મદેમ શતહિમાઃ સુવીરાઃ ॥ ૬.૦૦૪.૦૮

હુવે વઃ સૂનું સહસો યુવાનમદ્રોઘવાચં મતિભિર્યવિષ્ઠમ્ ।
ય ઇન્વતિ દ્રવિણાનિ પ્રચેતા વિશ્વવારાણિ પુરુવારો અધ્રુક્ ॥ ૬.૦૦૫.૦૧
ત્વે વસૂનિ પુર્વણીક હોતર્દોષા વસ્તોરેરિરે યજ્ઞિયાસઃ ।
ક્ષામેવ વિશ્વા ભુવનાનિ યસ્મિન્સં સૌભગાનિ દધિરે પાવકે ॥ ૬.૦૦૫.૦૨
ત્વં વિક્ષુ પ્રદિવઃ સીદ આસુ ક્રત્વા રથીરભવો વાર્યાણામ્ ।
અત ઇનોષિ વિધતે ચિકિત્વો વ્યાનુષગ્જાતવેદો વસૂનિ ॥ ૬.૦૦૫.૦૩
યો નઃ સનુત્યો અભિદાસદગ્ને યો અન્તરો મિત્રમહો વનુષ્યાત્ ।
તમજરેભિર્વૃષભિસ્તવ સ્વૈસ્તપા તપિષ્ઠ તપસા તપસ્વાન્ ॥ ૬.૦૦૫.૦૪
યસ્તે યજ્ઞેન સમિધા ય ઉક્થૈરર્કેભિઃ સૂનો સહસો દદાશત્ ।
સ મર્ત્યેષ્વમૃત પ્રચેતા રાયા દ્યુમ્નેન શ્રવસા વિ ભાતિ ॥ ૬.૦૦૫.૦૫
સ તત્કૃધીષિતસ્તૂયમગ્ને સ્પૃધો બાધસ્વ સહસા સહસ્વાન્ ।
યચ્છસ્યસે દ્યુભિરક્તો વચોભિસ્તજ્જુષસ્વ જરિતુર્ઘોષિ મન્મ ॥ ૬.૦૦૫.૦૬
અશ્યામ તં કામમગ્ને તવોતી અશ્યામ રયિં રયિવઃ સુવીરમ્ ।
અશ્યામ વાજમભિ વાજયન્તોઽશ્યામ દ્યુમ્નમજરાજરં તે ॥ ૬.૦૦૫.૦૭

પ્ર નવ્યસા સહસઃ સૂનુમચ્છા યજ્ઞેન ગાતુમવ ઇચ્છમાનઃ ।
વૃશ્ચદ્વનં કૃષ્ણયામં રુશન્તં વીતી હોતારં દિવ્યં જિગાતિ ॥ ૬.૦૦૬.૦૧
સ શ્વિતાનસ્તન્યતૂ રોચનસ્થા અજરેભિર્નાનદદ્ભિર્યવિષ્ઠઃ ।
યઃ પાવકઃ પુરુતમઃ પુરૂણિ પૃથૂન્યગ્નિરનુયાતિ ભર્વન્ ॥ ૬.૦૦૬.૦૨
વિ તે વિષ્વગ્વાતજૂતાસો અગ્ને ભામાસઃ શુચે શુચયશ્ચરન્તિ ।
તુવિમ્રક્ષાસો દિવ્યા નવગ્વા વના વનન્તિ ધૃષતા રુજન્તઃ ॥ ૬.૦૦૬.૦૩
યે તે શુક્રાસઃ શુચયઃ શુચિષ્મઃ ક્ષાં વપન્તિ વિષિતાસો અશ્વાઃ ।
અધ ભ્રમસ્ત ઉર્વિયા વિ ભાતિ યાતયમાનો અધિ સાનુ પૃશ્નેઃ ॥ ૬.૦૦૬.૦૪
અધ જિહ્વા પાપતીતિ પ્ર વૃષ્ણો ગોષુયુધો નાશનિઃ સૃજાના ।

શૂરસ્યેવ પ્રસિતિઃ ક્ષાતિરગ્નેર્દુર્વર્તુર્ભીમો દયતે વનાનિ ॥ ૬.૦૦૬.૦૫
આ ભાનુના પાર્થિવાનિ જ્રયાંસિ મહસ્તોદસ્ય ધૃષતા તતન્થ ।
સ બાધસ્વાપ ભયા સહોભિઃ સ્પૃધો વનુષ્યન્વનુષો નિ જૂર્વ ॥ ૬.૦૦૬.૦૬
સ ચિત્ર ચિત્રં ચિતયન્તમસ્મે ચિત્રક્ષત્ર ચિત્રતમં વયોધામ્ ।
ચન્દ્રં રયિં પુરુવીરં બૃહન્તં ચન્દ્ર ચન્દ્રાભિર્ગૃણતે યુવસ્વ ॥ ૬.૦૦૬.૦૭
મૂર્ધાનં દિવો અરતિં પૃથિવ્યા વૈશ્વાનરમૃત આ જાતમગ્નિમ્ ।
કવિં સમ્રાજમતિથિં જનાનામાસન્ના પાત્રં જનયન્ત દેવાઃ ॥ ૬.૦૦૭.૦૧
નાભિં યજ્ઞાનાં સદનં રયીણાં મહામાહાવમભિ સં નવન્ત ।
વૈશ્વાનરં રથ્યમધ્વરાણાં યજ્ઞસ્ય કેતું જનયન્ત દેવાઃ ॥ ૬.૦૦૭.૦૨
ત્વદ્વિપ્રો જાયતે વાજ્યગ્ને ત્વદ્વીરાસો અભિમાતિષાહઃ ।
વૈશ્વાનર ત્વમસ્માસુ ધેહિ વસૂનિ રાજન્સ્પૃહયાય્યાણિ ॥ ૬.૦૦૭.૦૩
ત્વાં વિશ્વે અમૃત જાયમાનં શિશું ન દેવા અભિ સં નવન્તે ।
તવ ક્રતુભિરમૃતત્વમાયન્વૈશ્વાનર યત્પિત્રોરદીદેઃ ॥ ૬.૦૦૭.૦૪
વૈશ્વાનર તવ તાનિ વ્રતાનિ મહાન્યગ્ને નકિરા દધર્ષ ।
યજ્જાયમાનઃ પિત્રોરુપસ્થેઽવિન્દઃ કેતું વયુનેષ્વહ્નામ્ ॥ ૬.૦૦૭.૦૫
વૈશ્વાનરસ્ય વિમિતાનિ ચક્ષસા સાનૂનિ દિવો અમૃતસ્ય કેતુના ।
તસ્યેદુ વિશ્વા ભુવનાધિ મૂર્ધનિ વયા ઇવ રુરુહુઃ સપ્ત વિસ્રુહઃ ॥ ૬.૦૦૭.૦૬
વિ યો રજાંસ્યમિમીત સુક્રતુર્વૈશ્વાનરો વિ દિવો રોચના કવિઃ ।
પરિ યો વિશ્વા ભુવનાનિ પપ્રથેઽદબ્ધો ગોપા અમૃતસ્ય રક્ષિતા ॥ ૬.૦૦૭.૦૭
પૃક્ષસ્ય વૃષ્ણો અરુષસ્ય નૂ સહઃ પ્ર નુ વોચં વિદથા જાતવેદસઃ ।
વૈશ્વાનરાય મતિર્નવ્યસી શુચિઃ સોમ ઇવ પવતે ચારુરગ્નયે ॥ ૬.૦૦૮.૦૧
સ જાયમાનઃ પરમે વ્યોમનિ વ્રતાન્યગ્નિર્વ્રતપા અરક્ષત ।
વ્ય૧ન્તરિક્ષમમિમીત સુક્રતુર્વૈશ્વાનરો મહિના નાકમસ્પૃશત્ ॥ ૬.૦૦૮.૦૨
વ્યસ્તભ્નાદ્રોદસી મિત્રો અદ્ભુતોઽન્તર્વાવદકૃણોજ્જ્યોતિષા તમઃ ।
વિ ચર્મણીવ ધિષણે અવર્તયદ્વૈશ્વાનરો વિશ્વમધત્ત વૃષ્ણ્યમ્ ॥ ૬.૦૦૮.૦૩
અપામુપસ્થે મહિષા અગૃભ્ણત વિશો રાજાનમુપ તસ્થુરૃગ્મિયમ્ ।
આ દૂતો અગ્નિમભરદ્વિવસ્વતો વૈશ્વાનરં માતરિશ્વા પરાવતઃ ॥ ૬.૦૦૮.૦૪

યુગેયુગે વિદથ્યં ગૃણદ્ભ્યોઽગ્ને રયિં યશસં ધેહિ નવ્યસીમ્ ।
પવ્યેવ રાજન્નઘશંસમજર નીચા નિ વૃશ્ચ વનિનં ન તેજસા ॥ ૬.૦૦૮.૦૫
અસ્માકમગ્ને મઘવત્સુ ધારયાનામિ ક્ષત્રમજરં સુવીર્યમ્ ।
વયં જયેમ શતિનં સહસ્રિણં વૈશ્વાનર વાજમગ્ને તવોતિભિઃ ॥ ૬.૦૦૮.૦૬
અદબ્ધેભિસ્તવ ગોપાભિરિષ્ટેઽસ્માકં પાહિ ત્રિષધસ્થ સૂરીન્ ।
રક્ષા ચ નો દદુષાં શર્ધો અગ્ને વૈશ્વાનર પ્ર ચ તારીઃ સ્તવાનઃ ॥ ૬.૦૦૮.૦૭
અહશ્ચ કૃષ્ણમહરર્જુનં ચ વિ વર્તેતે રજસી વેદ્યાભિઃ ।
વૈશ્વાનરો જાયમાનો ન રાજાવાતિરજ્જ્યોતિષાગ્નિસ્તમાંસિ ॥ ૬.૦૦૯.૦૧
નાહં તન્તું ન વિ જાનામ્યોતું ન યં વયન્તિ સમરેઽતમાનાઃ ।
કસ્ય સ્વિત્પુત્ર ઇહ વક્ત્વાનિ પરો વદાત્યવરેણ પિત્રા ॥ ૬.૦૦૯.૦૨
સ ઇત્તન્તું સ વિ જાનાત્યોતું સ વક્ત્વાન્યૃતુથા વદાતિ ।
ય ઈં ચિકેતદમૃતસ્ય ગોપા અવશ્ચરન્પરો અન્યેન પશ્યન્ ॥ ૬.૦૦૯.૦૩
અયં હોતા પ્રથમઃ પશ્યતેમમિદં જ્યોતિરમૃતં મર્ત્યેષુ ।
અયં સ જજ્ઞે ધ્રુવ આ નિષત્તોઽમર્ત્યસ્તન્વા૩ વર્ધમાનઃ ॥ ૬.૦૦૯.૦૪
ધ્રુવં જ્યોતિર્નિહિતં દૃશયે કં મનો જવિષ્ઠં પતયત્સ્વન્તઃ ।
વિશ્વે દેવાઃ સમનસઃ સકેતા એકં ક્રતુમભિ વિ યન્તિ સાધુ ॥ ૬.૦૦૯.૦૫
વિ મે કર્ણા પતયતો વિ ચક્ષુર્વીઉદં જ્યોતિર્હૃદય આહિતં યત્ ।
વિ મે મનશ્ચરતિ દૂરાધીઃ કિં સ્વિદ્વક્ષ્યામિ કિમુ નૂ મનિષ્યે ॥ ૬.૦૦૯.૦૬
વિશ્વે દેવા અનમસ્યન્ભિયાનાસ્ત્વામગ્ને તમસિ તસ્થિવાંસમ્ ।
વૈશ્વાનરોઽવતૂતયે નોઽમર્ત્યોઽવતૂતયે નઃ ॥ ૬.૦૦૯.૦૭
પુરો વો મન્દ્રં દિવ્યં સુવૃક્તિં પ્રયતિ યજ્ઞે અગ્નિમધ્વરે દધિધ્વમ્ ।
પુર ઉક્થેભિઃ સ હિ નો વિભાવા સ્વધ્વરા કરતિ જાતવેદાઃ ॥ ૬.૦૧૦.૦૧
તમુ દ્યુમઃ પુર્વણીક હોતરગ્ને અગ્નિભિર્મનુષ ઇધાનઃ ।
સ્તોમં યમસ્મૈ મમતેવ શૂષં ઘૃતં ન શુચિ મતયઃ પવન્તે ॥ ૬.૦૧૦.૦૨
પીપાય સ શ્રવસા મર્ત્યેષુ યો અગ્નયે દદાશ વિપ્ર ઉક્થૈઃ ।
ચિત્રાભિસ્તમૂતિભિશ્ચિત્રશોચિર્વ્રજસ્ય સાતા ગોમતો દધાતિ ॥ ૬.૦૧૦.૦૩
આ યઃ પપ્રૌ જાયમાન ઉર્વી દૂરેદૃશા ભાસા કૃષ્ણાધ્વા ।

અધ બહુ ચિત્તમ ઊર્મ્યાયાસ્તિરઃ શોચિષા દદૃશે પાવકઃ ॥ ૬.૦૧૦.૦૪
નૂ નશ્ચિત્રં પુરુવાજાભિરૂતી અગ્ને રયિં મઘવદ્ભ્યશ્ચ ધેહિ ।
યે રાધસા શ્રવસા ચાત્યન્યાન્સુવીર્યેભિશ્ચાભિ સન્તિ જનાન્ ॥ ૬.૦૧૦.૦૫
ઇમં યજ્ઞં ચનો ધા અગ્ન ઉશન્યં ત આસાનો જુહુતે હવિષ્માન્ ।
ભરદ્વાજેષુ દધિષે સુવૃક્તિમવીર્વાજસ્ય ગધ્યસ્ય સાતૌ ॥ ૬.૦૧૦.૦૬
વિ દ્વેષાંસીનુહિ વર્ધયેળાં મદેમ શતહિમાઃ સુવીરાઃ ॥ ૬.૦૧૦.૦૭

યજસ્વ હોતરિષિતો યજીયાનગ્ને બાધો મરુતાં ન પ્રયુક્તિ ।
આ નો મિત્રાવરુણા નાસત્યા ધાવા હોત્રાય પૃથિવી વવૃત્યાઃ ॥ ૬.૦૧૧.૦૧
ત્વં હોતા મન્દ્રતમો નો અધ્રુગન્તર્દેવો વિદથા મર્ત્યેષુ ।
પાવકયા જુહ્વાઉ વહ્નિરાસાગ્ને યજસ્વ તન્વં૧ તવ સ્વામ્ ॥ ૬.૦૧૧.૦૨
ધન્યા ચિદ્ધિ ત્વે ધિષણા વષ્ટિ પ્ર દેવાઞ્જન્મ ગૃણતે યજધ્યૈ ।
વેપિષ્ઠો અઙ્ગિરસાં યદ્ધ વિપ્રો મધુ ચ્છન્દો ભનતિ રેભ ઇષ્ટૌ ॥ ૬.૦૧૧.૦૩
અદિદ્યુતત્સ્વપાકો વિભાવાગ્ને યજસ્વ રોદસી ઉરૂચી ।
આયું ન યં નમસા રાતહવ્યા અઞ્જન્તિ સુપ્રયસં પઞ્ચ જનાઃ ॥ ૬.૦૧૧.૦૪
વૃઞ્જે હ યન્નમસા બર્હિરગ્નાવયામિ સ્રુગ્ઘૃતવતી સુવૃક્તિઃ ।
અમ્યક્ષિ સદ્મ સદને પૃથિવ્યા અશ્રાયિ યજ્ઞઃ સૂર્યે ન ચક્ષુઃ ॥ ૬.૦૧૧.૦૫
દશસ્યા નઃ પુર્વણીક હોતર્દેવેભિરગ્ને અગ્નિભિરિધાનઃ ।
રાયઃ સૂનો સહસો વાવસાના અતિ સ્રસેમ વૃજનં નાંહઃ ॥ ૬.૦૧૧.૦૬

મધ્યે હોતા દુરોણે બર્હિષો રાળગ્નિસ્તોદસ્ય રોદસી યજધ્યૈ ।
અયં સ સૂનુઃ સહસ ઋતાવા દૂરાત્સૂર્યો ન શોચિષા તતાન ॥ ૬.૦૧૨.૦૧
આ યસ્મિન્ત્વે સ્વપાકે યજત્ર યક્ષદ્રાજન્સર્વતાતેવ નુ દ્યૌઃ ।
ત્રિષધસ્થસ્તતરુષો ન જંહો હવ્યા મઘાનિ માનુષા યજધ્યૈ ॥ ૬.૦૧૨.૦૨
તેજિષ્ઠા યસ્યારતિર્વનેરાટ્ તોદો અધ્વન્ન વૃધસાનો અદ્યૌત્ ।
અદ્રોઘો ન દ્રવિતા ચેતતિ ત્મન્નમર્ત્યોઽવર્ત્ર ઓષધીષુ ॥ ૬.૦૧૨.૦૩
સાસ્માકેભિરેતરી ન શૂષૈરગ્નિઃ ષ્ટવે દમ આ જાતવેદાઃ ।
દ્ર્વન્નો વન્વન્ક્રત્વા નાર્વોસ્રઃ પિતેવ જારયાયિ યજ્ઞૈઃ ॥ ૬.૦૧૨.૦૪
અધ સ્માસ્ય પનયન્તિ ભાસો વૃથા યત્તક્ષદનુયાતિ પૃથ્વીમ્ ।

સદ્યો યઃ સ્યન્દ્રો વિષિતો ધવીયાનૃણો ન તાયુરતિ ધન્વા રાટ્ ॥ ૬.૦૧૨.૦૫

સ ત્વં નો અર્વન્નિદાયા વિશ્વેભિરગ્ને અગ્નિભિરિધાનઃ ।

વેષિ રાયો વિ યાસિ દુચ્છુના મદેમ શતહિમાઃ સુવીરાઃ ॥ ૬.૦૧૨.૦૬

ત્વદ્વિશ્વા સુભગ સૌભગાન્યગ્ને વિ યન્તિ વનિનો ન વયાઃ ।

શ્રુષ્ટી રયિર્વાજો વૃત્રતૂર્યે દિવો વૃષ્ટિરીડ્યો રીતિરપામ્ ॥ ૬.૦૧૩.૦૧

ત્વં ભગો ન આ હિ રત્નમિષે પરિજ્મેવ ક્ષયસિ દસ્મવર્ચાઃ ।

અગ્ને મિત્રો ન બૃહત ઋતસ્યાસિ ક્ષત્તા વામસ્ય દેવ ભૂરેઃ ॥ ૬.૦૧૩.૦૨

સ સત્પતિઃ શવસા હન્તિ વૃત્રમગ્ને વિપ્રો વિ પણેર્ભર્તિ વાજમ્ ।

યં ત્વં પ્રચેત ઋતજાત રાયા સજોષા નપ્ત્રાપાં હિનોષિ ॥ ૬.૦૧૩.૦૩

યસ્તે સૂનો સહસો ગીર્ભિરુક્થૈર્યજ્ઞૈર્મર્તો નિશિતિં વેદ્યાનટ્ ।

વિશ્વં સ દેવ પ્રતિ વારમગ્ને ધત્તે ધાન્યં૧ પત્યતે વસવ્યૈઃ ॥ ૬.૦૧૩.૦૪

તા નૃભ્ય આ સૌશ્રવસા સુવીરાગ્ને સૂનો સહસઃ પુષ્યસે ધાઃ ।

કૃણોષિ યચ્છવસા ભૂરિ પશ્વો વયો વૃકાયારયે જસુરયે ॥ ૬.૦૧૩.૦૫

વદ્મા સૂનો સહસો નો વિહાયા અગ્ને તોકં તનયં વાજિ નો દાઃ ।

વિશ્વાભિર્ગીર્ભિરભિ પૂર્તિમશ્યાં મદેમ શતહિમાઃ સુવીરાઃ ॥ ૬.૦૧૩.૦૬

અગ્ના યો મર્ત્યો દુવો ધિયં જુજોષ ધીતિભિઃ ।

ભસન્નુ ષ પ્ર પૂર્વ્ય ઇષં વુરીતાવસે ॥ ૬.૦૧૪.૦૧

અગ્નિરિદ્ધિ પ્રચેતા અગ્નિર્વેધસ્તમ ઋષિઃ ।

અગ્નિં હોતારમીળતે યજ્ઞેષુ મનુષો વિશઃ ॥ ૬.૦૧૪.૦૨

નાના હ્યગ્નેઽવસે સ્પર્ધન્તે રાયો અર્યઃ ।

તૂર્વન્તો દસ્યુમાયવો વ્રતૈઃ સીક્ષન્તો અવ્રતમ્ ॥ ૬.૦૧૪.૦૩

અગ્નિરપ્સામૃતીષહં વીરં દદાતિ સત્પતિમ્ ।

યસ્ય ત્રસન્તિ શવસઃ સંચક્ષિ શત્રવો ભિયા ॥ ૬.૦૧૪.૦૪

અગ્નિર્હિ વિદ્મના નિદો દેવો મર્તમુરુષ્યતિ ।

સહાવા યસ્યાવૃતો રયિર્વાજેષ્વવૃતઃ ॥ ૬.૦૧૪.૦૫

અચ્છા નો મિત્રમહો દેવ દેવાનગ્ને વોચઃ સુમતિં રોદસ્યોઃ ।

વીહિ સ્વસ્તિં સુક્ષિતિં દિવો નૄન્દ્વિષો અંહાંસિ દુરિતા તરેમ તા તરેમ તવાવસા તરેમ ॥ ૬.૦૧૪.૦૬

ઇમમૂ ષુ વો અતિથિમુષર્બુધં વિશ્વાસાં વિશાં પતિમૃઞ્જસે ગિરા ।
વેતીદ્દિવો જનુષા કચ્ચિદા શુચિર્જ્યોક્ચિદત્તિ ગર્ભો યદચ્યુતમ્ ॥ ૬.૦૧૫.૦૧
મિત્રં ન યં સુધિતં ભૃગવો દધુર્વનસ્પતાવીડ્યમૂર્ધ્વશોચિષમ્ ।
સ ત્વં સુપ્રીતો વીતહવ્યે અદ્ભુત પ્રશસ્તિભિર્મહયસે દિવેદિવે ॥ ૬.૦૧૫.૦૨
સ ત્વં દક્ષસ્યાવૃકો વૃધો ભૂરર્યઃ પરસ્યાન્તરસ્ય તરુષઃ ।
રાયઃ સૂનો સહસો મર્ત્યેષ્વા છર્દિર્યચ્છ વીતહવ્યાય સપ્રથો ભરદ્વાજાય સપ્રથઃ ॥ ૬.૦૧૫.૦૩
દ્યુતાનં વો અતિથિં સ્વર્ણરમગ્નિં હોતારં મનુષઃ સ્વધ્વરમ્ ।
વિપ્રં ન દ્યુક્ષવચસં સુવૃક્તિભિર્હવ્યવાહમરતિં દેવમૃઞ્જસે ॥ ૬.૦૧૫.૦૪
પાવકયા યશ્ચિતયન્ત્યા કૃપા ક્ષામન્રુરુચ ઉષસો ન ભાનુના ।
તૂર્વન્ન યામન્નેતશસ્ય નૂ રણ આ યો ઘૃણે ન તતૃષાણો અજરઃ ॥ ૬.૦૧૫.૦૫
અગ્નિમગ્નિં વઃ સમિધા દુવસ્યત પ્રિયમ્પ્રિયં વો અતિથિં ગૃણીષણિ ।
ઉપ વો ગીર્ભિરમૃતં વિવાસત દેવો દેવેષુ વનતે હિ વાર્યં દેવો દેવેષુ વનતે હિ નો દુવઃ ॥ ૬.૦૧૫.૦૬
સમિદ્ધમગ્નિં સમિધા ગિરા ગૃણે શુચિં પાવકં પુરો અધ્વરે ધ્રુવમ્ ।
વિપ્રં હોતારં પુરુવારમદ્રુહં કવિં સુમ્નૈરીમહે જાતવેદસમ્ ॥ ૬.૦૧૫.૦૭
ત્વાં દૂતમગ્ને અમૃતં યુગેયુગે હવ્યવાહં દધિરે પાયુમીડ્યમ્ ।
દેવાસશ્ચ મર્તાસશ્ચ જાગૃવિં વિભું વિશ્પતિં નમસા નિ ષેદિરે ॥ ૬.૦૧૫.૦૮
વિભૂષન્નગ્ન ઉભયાઁ અનુ વ્રતા દૂતો દેવાનાં રજસી સમીયસે ।
યત્તે ધીતિં સુમતિમાવૃણીમહેઽધ સ્મા નસ્ત્રિવરૂથઃ શિવો ભવ ॥ ૬.૦૧૫.૦૯
તં સુપ્રતીકં સુદૃશં સ્વઞ્ચમવિદ્વાંસો વિદુષ્ટરં સપેમ ।
સ યક્ષદ્વિશ્વા વયુનાનિ વિદ્વાન્પ્ર હવ્યમગ્નિરમૃતેષુ વોચત્ ॥ ૬.૦૧૫.૧૦
તમગ્ને પાસ્યુત તં પિપર્ષિ યસ્ત આનટ્ કવયે શૂર ધીતિમ્ ।
યજ્ઞસ્ય વા નિશિતિં વોદિતિં વા તમિત્પૃણક્ષિ શવસોત રાયા ॥ ૬.૦૧૫.૧૧
ત્વમગ્ને વનુષ્યતો નિ પાહિ ત્વમુ નઃ સહસાવન્નવદ્યાત્ ।
સં ત્વા ધ્વસ્મન્વદભ્યેતુ પાથઃ સં રયિઃ સ્પૃહયાય્યઃ સહસ્રી ॥ ૬.૦૧૫.૧૨
અગ્નિર્હોતા ગૃહપતિઃ સ રાજા વિશ્વા વેદ જનિમા જાતવેદાઃ ।
દેવાનામુત યો મર્ત્યાનાં યજિષ્ઠઃ સ પ્ર યજતામૃતાવા ॥ ૬.૦૧૫.૧૩
અગ્ને યદદ્ય વિશો અધ્વરસ્ય હોતઃ પાવકશોચે વેષ્ટ્વં હિ યજ્વા ।

ઋતા યજાસિ મહિના વિ યદ્ભૂર્હવ્યા વહ યવિષ્ઠ યા તે અદ્ય ॥ ૬.૦૧૫.૧૪
અભિ પ્રયાંસિ સુધિતાનિ હિ ખ્યો નિ ત્વા દધીત રોદસી યજધ્યૈ ।
અવા નો મઘવન્વાજસાતાવગ્ને વિશ્વાનિ દુરિતા તરેમ તા તરેમ તવાવસા તરેમ ॥ ૬.૦૧૫.૧૫
અગ્ને વિશ્વેભિઃ સ્વનીક દેવૈરૂર્ણાવન્તં પ્રથમઃ સીદ યોનિમ્ ।
કુલાયિનં ઘૃતવન્તં સવિત્રે યજ્ઞં નય યજમાનાય સાધુ ॥ ૬.૦૧૫.૧૬
ઇમમુ ત્યમથર્વવદગ્નિં મન્થન્તિ વેધસઃ ।
યમઙ્કૂયન્તમાનયન્નમૂરં શ્યાવ્યાભ્યઃ ॥ ૬.૦૧૫.૧૭
જનિષ્વા દેવવીતયે સર્વતાતા સ્વસ્તયે ।
આ દેવાન્વક્ષ્યમૃતાઁ ઋતાવૃધો યજ્ઞં દેવેષુ પિસ્પૃશઃ ॥ ૬.૦૧૫.૧૮
વયમુ ત્વા ગૃહપતે જનાનામગ્ને અકર્મ સમિધા બૃહન્તમ્ ।
અસ્થૂરિ નો ગાર્હપત્યાનિ સન્તુ તિગ્મેન નસ્તેજસા સં શિશાધિ ॥ ૬.૦૧૫.૧૯

ત્વમગ્ને યજ્ઞાનાં હોતા વિશ્વેષાં હિતઃ ।
દેવેભિર્માનુષે જને ॥ ૬.૦૧૬.૦૧
સ નો મન્દ્રાભિરધ્વરે જિહ્વાભિર્યજા મહઃ ।
આ દેવાન્વક્ષિ યક્ષિ ચ ॥ ૬.૦૧૬.૦૨
વેત્થા હિ વેધો અધ્વનઃ પથશ્ચ દેવાઞ્જસા ।
અગ્ને યજ્ઞેષુ સુક્રતો ॥ ૬.૦૧૬.૦૩
ત્વામીળે અધ દ્વિતા ભરતો વાજિભિઃ શુનમ્ ।
ઈજે યજ્ઞેષુ યજ્ઞિયમ્ ॥ ૬.૦૧૬.૦૪
ત્વમિમા વાર્યા પુરુ દિવોદાસાય સુન્વતે ।
ભરદ્વાજાય દાશુષે ॥ ૬.૦૧૬.૦૫
ત્વં દૂતો અમર્ત્ય આ વહા દૈવ્યં જનમ્ ।
શ઼ૃણ્વન્વિપ્રસ્ય સુષ્ટુતિમ્ ॥ ૬.૦૧૬.૦૬
ત્વામગ્ને સ્વાધ્યોઉ મર્તાસો દેવવીતયે ।
યજ્ઞેષુ દેવમીળતે ॥ ૬.૦૧૬.૦૭
તવ પ્ર યક્ષિ સંદૃશમુત ક્રતું સુદાનવઃ ।
વિશ્વે જુષન્ત કામિનઃ ॥ ૬.૦૧૬.૦૮

त्वं होता मनुर्हितो वह्निरासा विदुष्टरः ।
अग्ने यक्षि दिवो विशः ॥ ६.०१६.०९
अग्न आ याहि वीतये गृणानो हव्यदातये ।
नि होता सत्सि बर्हिषि ॥ ६.०१६.१०
तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि ।
बृहच्छोचा यविष्ठ्य ॥ ६.०१६.११
स नः पृथु श्रवाय्यमच्छा देव विवाससि ।
बृहदग्ने सुवीर्यम् ॥ ६.०१६.१२
त्वामग्ने पुष्करादध्यथर्वा निरमन्थत ।
मूर्ध्नो विश्वस्य वाघतः ॥ ६.०१६.१३
तमु त्वा दध्यङ्ङृषिः पुत्र ईधे अथर्वणः ।
वृत्रहणं पुरंदरम् ॥ ६.०१६.१४
तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम् ।
धनंजयं रणेरणे ॥ ६.०१६.१५
एह्यू षु ब्रवाणि तेऽग्न इत्थेतरा गिरः ।
एभिर्वर्धास इन्दुभिः ॥ ६.०१६.१६
यत्र क्व च ते मनो दक्षं दधस उत्तरम् ।
तत्रा सदः कृणवसे ॥ ६.०१६.१७
नहि ते पूर्तमक्षिपद्भुवन्नेमानां वसो ।
अथा दुवो वनवसे ॥ ६.०१६.१८
आग्निरगामि भारतो वृत्रहा पुरुचेतनः ।
दिवोदासस्य सत्पतिः ॥ ६.०१६.१९
स हि विश्वाति पार्थिवा रयिं दाशन्महित्वना ।
वन्वन्नवातो अस्तृतः ॥ ६.०१६.२०
स प्रत्नवन्नवीयसाग्ने द्युम्नेन संयता ।
बृहत्ततन्थ भानुना ॥ ६.०१६.२१
प्र वः सखायो अग्नये स्तोमं यज्ञं च धृष्णुया ।

અર્ચ ગાય ચ વેધસે ॥ ૬.૦૧૬.૨૨

સ હિ યો માનુષા યુગા સીદદ્ધોતા કવિક્રતુઃ ।

દૂતશ્ચ હવ્યવાહનઃ ॥ ૬.૦૧૬.૨૩

તા રાજાના શુચિવ્રતાદિત્યાન્મારુતં ગણમ્ ।

વસો યક્ષીહ રોદસી ॥ ૬.૦૧૬.૨૪

વસ્વી તે અગ્ને સંદૃષ્ટિરિષયતે મર્ત્યાય ।

ઊર્જો નપાદમૃતસ્ય ॥ ૬.૦૧૬.૨૫

ક્રત્વા દા અસ્તુ શ્રેષ્ઠોऽદ્ય ત્વા વન્વન્સુરેક્ણાઃ ।

મર્ત આનાશ સુવૃક્તિમ્ ॥ ૬.૦૧૬.૨૬

તે તે અગ્ને ત્વોતા ઇષયન્તો વિશ્વમાયુઃ ।

તરન્તો અર્યો અરાતીર્વન્વન્તો અર્યો અરાતીઃ ॥ ૬.૦૧૬.૨૭

અગ્નિસ્તિગ્મેન શોચિષા યાસદ્વિશ્વં ન્યત્રિણમ્ ।

અગ્નિર્નો વનતે રયિમ્ ॥ ૬.૦૧૬.૨૮

સુવીરં રયિમા ભર જાતવેદો વિચર્ષણે ।

જહિ રક્ષાંસિ સુક્રતો ॥ ૬.૦૧૬.૨૯

ત્વં નઃ પાહ્યંહસો જાતવેદો અઘાયતઃ ।

રક્ષા ણો બ્રહ્મણસ્કવે ॥ ૬.૦૧૬.૩૦

યો નો અગ્ને દુરેવ આ મર્તો વધાય દાશતિ ।

તસ્માન્નઃ પાહ્યંહસઃ ॥ ૬.૦૧૬.૩૧

ત્વં તં દેવ જિહ્વયા પરિ બાધસ્વ દુષ્કૃતમ્ ।

મર્તો યો નો જિઘાંસતિ ॥ ૬.૦૧૬.૩૨

ભરદ્વાજાય સપ્રથઃ શર્મ યચ્છ સહન્ત્ય ।

અગ્ને વરેણ્યં વસુ ॥ ૬.૦૧૬.૩૩

અગ્નિર્વૃત્રાણિ જઙ્ઘનદ્દ્રવિણસ્યુર્વિપન્યયા ।

સમિદ્ધઃ શુક્ર આહુતઃ ॥ ૬.૦૧૬.૩૪

ગર્ભે માતુઃ પિતુષ્પિતા વિદિદ્યુતાનો અક્ષરે ।

સીદન્નૃતસ્ય યોનિમા ॥ ૬.૦૧૬.૩૫

બ્રહ્મ પ્રજાવદા ભર જાતવેદો વિચર્ષણે ।

અગ્ને યદ્દીદયદ્દિવિ ॥ ૬.૦૧૬.૩૬

ઉપ ત્વા રણ્વસંદૃશં પ્રયસ્વન્તઃ સહસ્કૃત ।

અગ્ને સસૃજ્મહે ગિરઃ ॥ ૬.૦૧૬.૩૭

ઉપ ચ્છાયામિવ ઘૃણેરગન્મ શર્મ તે વયમ્ ।

અગ્ને હિરણ્યસંદૃશઃ ॥ ૬.૦૧૬.૩૮

ય ઉગ્ર ઇવ શર્યહા તિગ્મશૃઙ્ગો ન વંસગઃ ।

અગ્ને પુરો રુરોજિથ ॥ ૬.૦૧૬.૩૯

આ યં હસ્તે ન ખાદિનં શિશું જાતં ન બિભ્રતિ ।

વિશામગ્નિં સ્વધ્વરમ્ ॥ ૬.૦૧૬.૪૦

પ્ર દેવં દેવવીતયે ભરતા વસુવિત્તમમ્ ।

આ સ્વે યોનૌ નિ ષીદતુ ॥ ૬.૦૧૬.૪૧

આ જાતં જાતવેદસિ પ્રિયં શિશીતાતિથિમ્ ।

સ્યોન આ ગૃહપતિમ્ ॥ ૬.૦૧૬.૪૨

અગ્ને યુક્ષ્વા હિ યે તવાશ્વાસો દેવ સાધવઃ ।

અરં વહન્તિ મન્યવે ॥ ૬.૦૧૬.૪૩

અચ્છા નો યાહ્યા વહાભિ પ્રયાંસિ વીતયે ।

આ દેવાન્સોમપીતયે ॥ ૬.૦૧૬.૪૪

ઉદગ્ને ભારત દ્યુમદજસ્રેણ દવિદ્યુતત્ ।

શોચા વિ ભાહ્યજર ॥ ૬.૦૧૬.૪૫

વીતી યો દેવં મર્તો દુવસ્યેદગ્નિમીળીતાધ્વરે હવિષ્માન્ ।

હોતારં સત્યયજં રોદસ્યોરુત્તાનહસ્તો નમસા વિવાસેત્ ॥ ૬.૦૧૬.૪૬

આ તે અગ્ન ઋચા હવિર્હૃદા તષ્ટં ભરામસિ ।

તે તે ભવન્તૂક્ષણ ઋષભાસો વશા ઉત ॥ ૬.૦૧૬.૪૭

અગ્નિં દેવાસો અગ્રિયમિન્ધતે વૃત્રહન્તમમ્ ।

યેના વસૂન્યાભૃતા તૃળ્હા રક્ષાંસિ વાજિના ॥ ૬.૦૧૬.૪૮

પિબા સોમમભિ યમુગ્ર તર્દ ઊર્વં ગવ્યં મહિ ગૃણાન ઇન્દ્ર ।

વિ યો ધૃષ્ણો વધિષો વજ્રહસ્ત વિશ્વા વૃત્રમમિત્રિયા શવોભિઃ ॥ ૬.૦૧૭.૦૧

સ ઈં પાહિ ય ઋજીષી તરુત્રો યઃ શિપ્રવાન્વૃષભો યો મતીનામ્ ।

યો ગોત્રભિદ્વજ્રભૃદ્યો હરિષ્ઠાઃ સ ઇન્દ્ર ચિત્રાઁ અભિ તૃન્ધિ વાજાન્ ॥ ૬.૦૧૭.૦૨

એવા પાહિ પ્રત્નથા મન્દતુ ત્વા શ્રુધિ બ્રહ્મ વાવૃધસ્વોત ગીર્ભિઃ ।

આવિઃ સૂર્યં કૃણુહિ પીપિહીષો જહિ શત્રૂઁરભિ ગા ઇન્દ્ર તૃન્ધિ ॥ ૬.૦૧૭.૦૩

તે ત્વા મદા બૃહદિન્દ્ર સ્વધાવ ઇમે પીતા ઉક્ષયન્ત દ્યુમન્તમ્ ।

મહામનૂનં તવસં વિભૂતિં મત્સરાસો જર્હૃષન્ત પ્રસાહમ્ ॥ ૬.૦૧૭.૦૪

યેભિઃ સૂર્યમુષસં મન્દસાનોઽવાસયોઽપ દૃળ્હાનિ દર્દ્રત્ ।

મહામદ્રિં પરિ ગા ઇન્દ્ર સન્તં નુત્થા અચ્યુતં સદસસ્પરિ સ્વાત્ ॥ ૬.૦૧૭.૦૫

તવ ક્રત્વા તવ તદ્દંસનાભિરામાસુ પક્વં શચ્યા નિ દીધઃ ।

ઔર્ણોર્દુર ઉસ્રિયાભ્યો વિ દૃળ્હોદૂર્વાદ્ગા અસૃજો અઙ્ગિરસ્વાન્ ॥ ૬.૦૧૭.૦૬

પપ્રાથ ક્ષાં મહિ દંસો વ્યુ૧ર્વીમુપ દ્યામૃષ્વો બૃહદિન્દ્ર સ્તભાયઃ ।

અધારયો રોદસી દેવપુત્રે પ્રત્ને માતરા યહ્વી ઋતસ્ય ॥ ૬.૦૧૭.૦૭

અધ ત્વા વિશ્વે પુર ઇન્દ્ર દેવા એકં તવસં દધિરે ભરાય ।

અદેવો યદભ્યૌહિષ્ટ દેવાન્સ્વર્ષાતા વૃણત ઇન્દ્રમત્ર ॥ ૬.૦૧૭.૦૮

અધ દ્યૌશ્ચિત્તે અપ સા નુ વજ્રાદ્દ્વિતાનમદ્ભિયસા સ્વસ્ય મન્યોઃ ।

અહિં યદિન્દ્રો અભ્યોહસાનં નિ ચિદ્વિશ્વાયુઃ શયથે જઘાન ॥ ૬.૦૧૭.૦૯

અધ ત્વષ્ટા તે મહ ઉગ્ર વજ્રં સહસ્રભૃષ્ટિં વવૃતચ્છતાશ્રિમ્ ।

નિકામમરમણસં યેન નવન્તમહિં સં પિણગૃજીષિન્ ॥ ૬.૦૧૭.૧૦

વર્ધાન્યં વિશ્વે મરુતઃ સજોષાઃ પચચ્છતં મહિષાઁ ઇન્દ્ર તુભ્યમ્ ।

પૂષા વિષ્ણુસ્ત્રીણિ સરાંસિ ધાવન્વૃત્રહણં મદિરમંશુમસ્મૈ ॥ ૬.૦૧૭.૧૧

આ ક્ષોદો મહિ વૃતં નદીનાં પરિષ્ઠિતમસૃજ ઊર્મિમપામ્ ।

તાસામનુ પ્રવત ઇન્દ્ર પન્થાં પ્રાર્દયો નીચીરપસઃ સમુદ્રમ્ ॥ ૬.૦૧૭.૧૨

એવા તા વિશ્વા ચકૃવાંસમિન્દ્રં મહામુગ્રમજુર્યં સહોદામ્ ।

સુવીરં ત્વા સ્વાયુધં સુવજ્રમા બ્રહ્મ નવ્યમવસે વવૃત્યાત્ ॥ ૬.૦૧૭.૧૩

સ નો વાજાય શ્રવસ ઇષે ચ રાયે ધેહિ દ્યુમત ઇન્દ્ર વિપ્રાન્ ।

ભરદ્વાજે નૃવત ઇન્દ્ર સૂરીન્દિવિ ચ સ્મૈધિ પાર્યે ન ઇન્દ્ર ॥ ૬.૦૧૭.૧૪

અયા વાજં દેવહિતં સનેમ મદેમ શતહિમાઃ સુવીરાઃ ॥ ૬.૦૧૭.૧૫

તમુ ષ્ટુહિ યો અભિભૂત્યોજા વન્વન્નવાતઃ પુરુહૂત ઇન્દ્રઃ ।

અષાળ્હમુગ્રં સહમાનમાભિર્ગીર્ભિર્વર્ધ વૃષભં ચર્ષણીનામ્ ॥ ૬.૦૧૮.૦૧

સ યુધ્મઃ સત્વા ખજકૃત્સમદ્વા તુવિમ્રક્ષો નદનુમાઁ ઋજીષી ।

બૃહદ્રેણુશ્ચ્યવનો માનુષીણામેકઃ કૃષ્ટીનામભવત્સહાવા ॥ ૬.૦૧૮.૦૨

ત્વં હ નુ ત્યદદમાયો દસ્યૂઁરેકઃ કૃષ્ટીરવનોરાર્યાય ।

અસ્તિ સ્વિન્નુ વીર્યં૧ તત્ત ઇન્દ્ર ન સ્વિદસ્તિ તદૃતુથા વિ વોચઃ ॥ ૬.૦૧૮.૦૩

સદિદ્ધિ તે તુવિજાતસ્ય મન્યે સહઃ સહિષ્ઠ તુરતસ્તુરસ્ય ।

ઉગ્રમુગ્રસ્ય તવસસ્તવીયોઽરધ્રસ્ય રધ્રતુરો બભૂવ ॥ ૬.૦૧૮.૦૪

તન્નઃ પ્રત્નં સખ્યમસ્તુ યુષ્મે ઇત્થા વદદ્ભિર્વલમઙ્ગિરોભિઃ ।

હન્નચ્યુતચ્યુદ્દસ્મેષયન્તમૃણોઃ પુરો વિ દુરો અસ્ય વિશ્વાઃ ॥ ૬.૦૧૮.૦૫

સ હિ ધીભિર્હવ્યો અસ્ત્યુગ્ર ઈશાનકૃન્મહતિ વૃત્રતૂર્યે ।

સ તોકસાતા તનયે સ વજ્રી વિતન્તસાય્યો અભવત્સમત્સુ ॥ ૬.૦૧૮.૦૬

સ મજ્મના જનિમ માનુષાણામમર્ત્યેન નામ્નાતિ પ્ર સર્સ્રે ।

સ દ્યુમ્નેન સ શવસોત રાયા સ વીર્યેણ નૃતમઃ સમોકાઃ ॥ ૬.૦૧૮.૦૭

સ યો ન મુહે ન મિથૂ જનો ભૂત્સુમન્તુનામા ચુમુરિં ધુનિં ચ ।

વૃણક્પિપ્રું શમ્બરં શુષ્ણમિન્દ્રઃ પુરાં ચ્યૌત્નાય શયથાય નૂ ચિત્ ॥ ૬.૦૧૮.૦૮

ઉદાવતા ત્વક્ષસા પન્યસા ચ વૃત્રહત્યાય રથમિન્દ્ર તિષ્ઠ ।

ધિષ્વ વજ્રં હસ્ત આ દક્ષિણત્રાભિ પ્ર મન્દ પુરુદત્ર માયાઃ ॥ ૬.૦૧૮.૦૯

અગ્નિર્ન શુષ્કં વનમિન્દ્ર હેતી રક્ષો નિ ધક્ષ્યશનિર્ન ભીમા ।

ગમ્ભીરય ઋષ્વયા યો રુરોજાધ્વાનયદ્દુરિતા દમ્ભયચ્ચ ॥ ૬.૦૧૮.૧૦

આ સહસ્રં પથિભિરિન્દ્ર રાયા તુવિદ્યુમ્ન તુવિવાજેભિરર્વાક્ ।

યાહિ સૂનો સહસો યસ્ય નૂ ચિદદેવ ઈશે પુરુહૂત યોતોઃ ॥ ૬.૦૧૮.૧૧

પ્ર તુવિદ્યુમ્નસ્ય સ્થવિરસ્ય ઘૃષ્વેર્દિવો રરપ્શે મહિમા પૃથિવ્યાઃ ।

નાસ્ય શત્રુર્ન પ્રતિમાનમસ્તિ ન પ્રતિષ્ઠિઃ પુરુમાયસ્ય સહ્યોઃ ॥ ૬.૦૧૮.૧૨

પ્ર તત્તે અદ્યા કરણં કૃતં ભૂત્કુત્સં યદાયુમતિથિગ્વમસ્મૈ ।

પુરૂ સહસ્રા નિ શિશા અભિ ક્ષામુત્તૂર્વયાણં ધૃષતા નિનેથ ॥ ૬.૦૧૮.૧૩

અનુ ત્વાહિઘ્ને અધ દેવ દેવા મદન્વિશ્વે કવિતમં કવીનામ્ ।
કરો યત્ર વરિવો બાધિતાય દિવે જનાય તન્વે ગૃણાનઃ ॥ ૬.૦૧૮.૧૪
અનુ દ્યાવાપૃથિવી તત્ત ઓજોઽમર્ત્યા જિહત ઇન્દ્ર દેવાઃ ।
કૃષ્વા કૃત્નો અકૃતં યત્તે અસ્ત્યુક્થં નવીયો જનયસ્વ યજ્ઞૈઃ ॥ ૬.૦૧૮.૧૫

મહાઁ ઇન્દ્રો નૃવદા ચર્ષણિપ્રા ઉત દ્વિબર્હા અમિનઃ સહોભિઃ ।
અસ્મદ્ર્યગ્વાવૃધે વીર્યાયોરુઃ પૃથુઃ સુકૃતઃ કર્તૃભિર્ભૂત્ ॥ ૬.૦૧૯.૦૧
ઇન્દ્રમેવ ધિષણા સાતયે ધાદ્બૃહન્તમૃષ્વમજરં યુવાનમ્ ।
અષાળ્હેન શવસા શૂશુવાંસં સદ્યશ્ચિદ્યો વાવૃધે અસામિ ॥ ૬.૦૧૯.૦૨
પૃથૂ કરસ્ના બહુલા ગભસ્તી અસ્મદ્ર્ય૧ક્સં મિમીહિ શ્રવાંસિ ।
યૂથેવ પશ્વઃ પશુપા દમૂના અસ્માઁ ઇન્દ્રાભ્યા વવૃત્સ્વાજૌ ॥ ૬.૦૧૯.૦૩
તં વ ઇન્દ્રં ચતિનમસ્ય શાકૈરિહ નૂનં વાજયન્તો હુવેમ ।
યથા ચિત્પૂર્વે જરિતાર આસુરનેદ્યા અનવદ્યા અરિષ્ટાઃ ॥ ૬.૦૧૯.૦૪
ધૃતવ્રતો ધનદાઃ સોમવૃદ્ધઃ સ હિ વામસ્ય વસુનઃ પુરુક્ષુઃ ।
સં જગ્મિરે પથ્યા૩ રાયો અસ્મિન્સમુદ્રે ન સિન્ધવો યાદમાનાઃ ॥ ૬.૦૧૯.૦૫
શવિષ્ઠં ન આ ભર શૂર શવ ઓજિષ્ઠમોજો અભિભૂત ઉગ્રમ્ ।
વિશ્વા દ્યુમ્ના વૃષ્ણ્યા માનુષાણામસ્મભ્યં દા હરિવો માદયધ્યૈ ॥ ૬.૦૧૯.૦૬
યસ્તે મદઃ પૃતનાષાળમૃધ્ર ઇન્દ્ર તં ન આ ભર શૂશુવાંસમ્ ।
યેન તોકસ્ય તનયસ્ય સાતૌ મંસીમહિ જિગીવાંસસ્ત્વોતાઃ ॥ ૬.૦૧૯.૦૭
આ નો ભર વૃષણં શુષ્મમિન્દ્ર ધનસ્પૃતં શૂશુવાંસં સુદક્ષમ્ ।
યેન વંસામ પૃતનાસુ શત્રૂન્તવોતિભિરુત જામીઁરજામીન્ ॥ ૬.૦૧૯.૦૮
આ તે શુષ્મો વૃષભ એતુ પશ્ચાદોત્તરાદધરાદા પુરસ્તાત્ ।
આ વિશ્વતો અભિ સમેત્વર્વાઙિન્દ્ર દ્યુમ્નં સ્વર્વદ્ધેહ્યસ્મે ॥ ૬.૦૧૯.૦૯
નૃવત્ત ઇન્દ્ર નૃતમાભિરૂતી વંસીમહિ વામં શ્રોમતેભિઃ ।
ઈક્ષે હિ વસ્વ ઉભયસ્ય રાજન્ધા રત્નં મહિ સ્થૂરં બૃહન્તમ્ ॥ ૬.૦૧૯.૧૦
મરુત્વન્તં વૃષભં વાવૃધાનમકવારિં દિવ્યં શાસમિન્દ્રમ્ ।
વિશ્વાસાહમવસે નૂતનાયોગ્રં સહોદામિહ તં હુવેમ ॥ ૬.૦૧૯.૧૧
જનં વજ્રિન્મહિ ચિન્મન્યમાનમેભ્યો નૃભ્યો રન્ધયા યેષ્વસ્મિ ।

અધા હિ ત્વા પૃથિવ્યાં શૂરસાતૌ હવામહે તનયે ગોષ્વપ્સુ ॥ ૬.૦૧૯.૧૨

વયં ત એભિઃ પુરુહૂત સખ્યૈઃ શત્રોઃશત્રોરુત્તર ઇત્સ્યામ ।

ઘ્નન્તો વૃત્રાણ્યુભયાનિ શૂર રાયા મદેમ બૃહતા ત્વોતાઃ ॥ ૬.૦૧૯.૧૩

ધૌર્ન ય ઇન્દ્રાભિ ભૂમાર્યસ્તસ્થૌ રયિઃ શવસા પૃત્સુ જનાન્ ।

તં નઃ સહસ્રભરમુર્વરાસાં દદ્ધિ સૂનો સહસો વૃત્રતુરમ્ ॥ ૬.૦૨૦.૦૧

દિવો ન તુભ્યમન્વિન્દ્ર સત્રાસુર્યં દેવેભિર્ધાયિ વિશ્વમ્ ।

અહિં યદ્વૃત્રમપો વવ્રિવાંસં હન્નૃજીષિન્વિષ્ણુના સચાનઃ ॥ ૬.૦૨૦.૦૨

તૂર્વન્નોજીયાન્તવસસ્તવીયાન્કૃતબ્રહ્મેન્દ્રો વૃદ્ધમહાઃ ।

રાજાભવન્મધુનઃ સોમ્યસ્ય વિશ્વાસાં યત્પુરાં દર્ત્નુમાવત્ ॥ ૬.૦૨૦.૦૩

શતૈરપદ્રન્પણય ઇન્દ્રાત્ર દશોણયે કવયેઽર્કસાતૌ ।

વધૈઃ શુષ્ણસ્યાશુષસ્ય માયાઃ પિત્વો નારિરેચીત્કિં ચન પ્ર ॥ ૬.૦૨૦.૦૪

મહો દ્રુહો અપ વિશ્વાયુ ધાયિ વજ્રસ્ય યત્પતને પાદિ શુષ્ણઃ ।

ઉરુ ષ સરથં સારથયે કરિન્દ્રઃ કુત્સાય સૂર્યસ્ય સાતૌ ॥ ૬.૦૨૦.૦૫

પ્ર શ્યેનો ન મદિરમંશુમસ્મૈ શિરો દાસસ્ય નમુચેર્મથાયન્ ।

પ્રાવન્નમીં સાપ્યં સસન્તં પૃણગ્રાયા સમિષા સં સ્વસ્તિ ॥ ૬.૦૨૦.૦૬

વિ પિપ્રોરહિમાયસ્ય દૃળ્હાઃ પુરો વજ્રિઞ્છવસા ન દર્દઃ ।

સુદામન્તદ્રેક્ણો અપ્રમૃષ્યમૃજિશ્વને દાત્રં દાશુષે દાઃ ॥ ૬.૦૨૦.૦૭

સ વેતસું દશમાયં દશોણિં તૂતુજિમિન્દ્રઃ સ્વભિષ્ટિસુમ્નઃ ।

આ તુગ્રં શશ્વદિભં દ્યોતનાય માતુર્ન સીમુપ સૃજા ઇયધ્યૈ ॥ ૬.૦૨૦.૦૮

સ ઈં સ્પૃધો વનતે અપ્રતીતો બિભ્રદ્વજ્રં વૃત્રહણં ગભસ્તૌ ।

તિષ્ઠદ્ધરી અધ્યસ્તેવ ગર્તે વચોયુજા વહત ઇન્દ્રમૃષ્વમ્ ॥ ૬.૦૨૦.૦૯

સનેમ તેઽવસા નવ્ય ઇન્દ્ર પ્ર પૂરવઃ સ્તવન્ત એના યજ્ઞૈઃ ।

સપ્ત યત્પુરઃ શર્મ શારદીર્દર્દ્ધન્દાસીઃ પુરુકુત્સાય શિક્ષન્ ॥ ૬.૦૨૦.૧૦

ત્વં વૃધ ઇન્દ્ર પૂર્વ્યો ભૂર્વરિવસ્યન્નુશને કાવ્યાય ।

પરા નવવાસ્ત્વમનુદેયં મહે પિત્રે દદાથ સ્વં નપાતમ્ ॥ ૬.૦૨૦.૧૧

ત્વં ધુનિરિન્દ્ર ધુનિમતીરૃણોરપઃ સીરા ન સ્રવન્તીઃ ।

પ્ર યત્સમુદ્રમતિ શૂર પર્ષિ પારયા તુર્વશં યદું સ્વસ્તિ ॥ ૬.૦૨૦.૧૨

તવ હ ત્યદિન્દ્ર વિશ્વમાજૌ સસ્તો ધુનીચુમુરી યા હ સિષ્વપ્ ।
દીદયદિત્તુભ્યં સોમેભિઃ સુન્વન્દભીતિરિધ્મભૃતિઃ પક્થ્યર્કૈઃ ॥ ૬.૦૨૦.૧૩

ઇમા ઉ ત્વા પુરુતમસ્ય કારોર્હવ્યં વીર હવ્યા હવન્તે ।
ધિયો રથેષ્ઠામજરં નવીયો રયિર્વિભૂતિરીયતે વચસ્યા ॥ ૬.૦૨૧.૦૧
તમુ સ્તુષ ઇન્દ્રં યો વિદાનો ગિર્વાહસં ગીર્ભિર્યજ્ઞવૃદ્ધમ્ ।
યસ્ય દિવમતિ મહ્ના પૃથિવ્યાઃ પુરુમાયસ્ય રિરિચે મહિત્વમ્ ॥ ૬.૦૨૧.૦૨
સ ઇત્તમોઽવયુનં તતન્વત્સૂર્યેણ વયુનવચ્ચકાર ।
કદા તે મર્તા અમૃતસ્ય ધામેયક્ષન્તો ન મિનન્તિ સ્વધાવઃ ॥ ૬.૦૨૧.૦૩
યસ્તા ચકાર સ કુહ સ્વિદિન્દ્રઃ કમા જનં ચરતિ કાસુ વિક્ષુ ।
કસ્તે યજ્ઞો મનસે શં વરાય કો અર્ક ઇન્દ્ર કતમઃ સ હોતા ॥ ૬.૦૨૧.૦૪
ઇદા હિ તે વેવિષતઃ પુરાજાઃ પ્રત્નાસ આસુઃ પુરુકૃત્સખાયઃ ।
યે મધ્યમાસ ઉત નૂતનાસ ઉતાવમસ્ય પુરુહૂત બોધિ ॥ ૬.૦૨૧.૦૫
તં પૃચ્છન્તોઽવરાસઃ પરાણિ પ્રત્ના ત ઇન્દ્ર શ્રુત્યાનુ યેમુઃ ।
અર્ચામસિ વીર બ્રહ્મવાહો યાદેવ વિદ્મ તાત્ત્વા મહાન્તમ્ ॥ ૬.૦૨૧.૦૬
અભિ ત્વા પાજો રક્ષસો વિ તસ્થે મહિ જજ્ઞાનમભિ તત્સુ તિષ્ઠ ।
તવ પ્રત્નેન યુજ્યેન સખ્યા વજ્રેણ ધૃષ્ણો અપ તા નુદસ્વ ॥ ૬.૦૨૧.૦૭
સ તુ શ્રુધીન્દ્ર નૂતનસ્ય બ્રહ્મણ્યતો વીર કારુધાયઃ ।
ત્વં હ્યાઉપિઃ પ્રદિવિ પિતૄણાં શશ્વદ્બભૂથ સુહવ એષ્ટૌ ॥ ૬.૦૨૧.૦૮
પ્રોતયે વરુણં મિત્રમિન્દ્રં મરુતઃ કૃષ્વાવસે નો અદ્ય ।
પ્ર પૂષણં વિષ્ણુમગ્નિં પુરંધિં સવિતારમોષધીઃ પર્વતાઁશ્ચ ॥ ૬.૦૨૧.૦૯
ઇમ ઉ ત્વા પુરુશાક પ્રયજ્યો જરિતારો અભ્યર્ચન્ત્યર્કૈઃ ।
શ્રુધી હવમા હુવતો હુવાનો ન ત્વાવાઁ અન્યો અમૃત ત્વદસ્તિ ॥ ૬.૦૨૧.૧૦
નૂ મ આ વાચમુપ યાહિ વિદ્વાન્વિશ્વેભિઃ સૂનો સહસો યજત્રૈઃ ।
યે અગ્નિજિહ્વા ઋતસાપ આસુર્યે મનું ચક્રુરુપરં દસાય ॥ ૬.૦૨૧.૧૧
સ નો બોધિ પુરએતા સુગેષૂત દુર્ગેષુ પથિકૃદ્વિદાનઃ ।
યે અશ્રમાસ ઉરવો વહિષ્ઠાસ્તેભિર્ન ઇન્દ્રાભિ વક્ષિ વાજમ્ ॥ ૬.૦૨૧.૧૨

ય એક ઇદ્ધવ્યશ્ચર્ષણીનામિન્દ્રં તં ગીર્ભિરભ્યર્ચ આભિઃ ।

યઃ પત્યતે વૃષભો વૃષ્ણ્યાવાન્સત્યઃ સત્વા પુરુમાયઃ સહસ્વાન્ ॥ ૬.૦૨૨.૦૧

તમુ નઃ પૂર્વે પિતરો નવગ્વાઃ સપ્ત વિપ્રાસો અભિ વાજયન્તઃ ।

નક્ષદ્દાભં તતુરિં પર્વતેષ્ઠામદ્રોઘવાચં મતિભિઃ શવિષ્ઠમ્ ॥ ૬.૦૨૨.૦૨

તમીમહ ઇન્દ્રમસ્ય રાયઃ પુરુવીરસ્ય નૃવતઃ પુરુક્ષોઃ ।

યો અસ્કૃધોયુરજરઃ સ્વર્વાન્તમા ભર હરિવો માદયધ્યૈ ॥ ૬.૦૨૨.૦૩

તન્નો વિ વોચો યદિ તે પુરા ચિજ્જરિતાર આનશુઃ સુમ્નમિન્દ્ર ।

કસ્તે ભાગઃ કિં વયો દુધ્ર ખિદ્વઃ પુરુહૂત પુરૂવસોઽસુરઘ્નઃ ॥ ૬.૦૨૨.૦૪

તં પૃચ્છન્તી વજ્રહસ્તં રથેષ્ઠામિન્દ્રં વેપી વક્વરી યસ્ય નૂ ગીઃ ।

તુવિગ્રાભં તુવિકૂર્મિં રભોદાં ગાતુમિષે નક્ષતે તુમ્રમચ્છ ॥ ૬.૦૨૨.૦૫

અયા હ ત્યં માયયા વાવૃધાનં મનોજુવા સ્વતવઃ પર્વતેન ।

અચ્યુતા ચિદ્વીળિતા સ્વોજો રુજો વિ દૃળ્હા ધૃષતા વિરપ્શિન્ ॥ ૬.૦૨૨.૦૬

તં વો ધિયા નવ્યસ્યા શવિષ્ઠં પ્રત્નં પ્રત્નવત્પરિતંસયધ્યૈ ।

સ નો વક્ષદનિમાનઃ સુવહ્મેન્દ્રો વિશ્વાન્યતિ દુર્ગહાણિ ॥ ૬.૦૨૨.૦૭

આ જનાય દ્રુહ્વણે પાર્થિવાનિ દિવ્યાનિ દીપયોઽન્તરિક્ષા ।

તપા વૃષન્વિશ્વતઃ શોચિષા તાન્બ્રહ્મદ્વિષે શોચય ક્ષામપશ્ચ ॥ ૬.૦૨૨.૦૮

ભુવો જનસ્ય દિવ્યસ્ય રાજા પાર્થિવસ્ય જગતસ્ત્વેષસંદૃક્ ।

ધિષ્વ વજ્રં દક્ષિણ ઇન્દ્ર હસ્તે વિશ્વા અજુર્ય દયસે વિ માયાઃ ॥ ૬.૦૨૨.૦૯

આ સંયતમિન્દ્ર ણઃ સ્વસ્તિં શત્રુતૂર્યાય બૃહતીમમૃધ્રામ્ ।

યયા દાસાન્યાર્યાણિ વૃત્રા કરો વજ્રિન્સુતુકા નાહુષાણિ ॥ ૬.૦૨૨.૧૦

સ નો નિયુદ્ભિઃ પુરુહૂત વેધો વિશ્વવારાભિરા ગહિ પ્રયજ્યો ।

ન યા અદેવો વરતે ન દેવ આભિર્યાહિ તૂયમા મદ્ર્યદ્રિક્ ॥ ૬.૦૨૨.૧૧

સુત ઇત્ત્વં નિમિશ્લ ઇન્દ્ર સોમે સ્તોમે બ્રહ્મણિ શસ્યમાન ઉક્થે ।

યદ્વા યુક્તાભ્યાં મઘવન્હરિભ્યાં બિભ્રદ્વજ્રં બાહ્વોરિન્દ્ર યાસિ ॥ ૬.૦૨૩.૦૧

યદ્વા દિવિ પાર્યે સુષ્વિમિન્દ્ર વૃત્રહત્યેઽવસિ શૂરસાતૌ ।

યદ્વા દક્ષસ્ય બિભ્યુષો અબિભ્યદરન્ધયઃ શર્ધત ઇન્દ્ર દસ્યૂન્ ॥ ૬.૦૨૩.૦૨

પાતા સુતમિન્દ્રો અસ્તુ સોમં પ્રણેનીરુગ્રો જરિતારમૂતી ।

કર્તા વીરાય સુષ્વય ઉ લોકં દાતા વસુ સ્તુવતે કીરયે ચિત્ ॥ ૬.૦૨૩.૦૩

ગન્તેયાન્તિ સવના હરિભ્યાં બભ્રિર્વજ્રં પપિઃ સોમં દદિર્ગાઃ ।
કર્તા વીરં નર્યં સર્વવીરં શ્રોતા હવં ગૃણતઃ સ્તોમવાહાઃ ॥ ૬.૦૨૩.૦૪
અસ્મૈ વયં યદ્વાવાન તદ્વિવિષ્મ ઇન્દ્રાય યો નઃ પ્રદિવો અપસ્કઃ ।
સુતે સોમે સ્તુમસિ શંસદુક્થેન્દ્રાય બ્રહ્મ વર્ધનં યથાસત્ ॥ ૬.૦૨૩.૦૫
બ્રહ્માણિ હિ ચકૃષે વર્ધનાનિ તાવત્ત ઇન્દ્ર મતિભિર્વિવિષ્મઃ ।
સુતે સોમે સુતપાઃ શંતમાનિ રાણ્ડ્યા ક્રિયાસ્મ વક્ષણાનિ યજ્ઞૈઃ ॥ ૬.૦૨૩.૦૬
સ નો બોધિ પુરોળાશં રરાણઃ પિબા તુ સોમં ગોઋજીકમિન્દ્ર ।
એદં બર્હિર્યજમાનસ્ય સીદોરું કૃધિ ત્વાયત ઉ લોકમ્ ॥ ૬.૦૨૩.૦૭
સ મન્દસ્વા હ્યનુ જોષમુગ્ર પ્ર ત્વા યજ્ઞાસ ઇમે અશ્નુવન્તુ ।
પ્રેમે હવાસઃ પુરુહૂતમસ્મે આ ત્વેયં ધીરવસ ઇન્દ્ર યમ્યાઃ ॥ ૬.૦૨૩.૦૮
તં વઃ સખાયઃ સં યથા સુતેષુ સોમેભિરીં પૃણતા ભોજમિન્દ્રમ્ ।
કુવિત્તસ્મા અસતિ નો ભરાય ન સુષ્વિમિન્દ્રોઽવસે મૃધાતિ ॥ ૬.૦૨૩.૦૯
એવેદિન્દ્રઃ સુતે અસ્તાવિ સોમે ભરદ્વાજેષુ ક્ષયદિન્મઘોનઃ ।
અસદ્યથા જરિત્ર ઉત સૂરિરિન્દ્રો રાયો વિશ્વવારસ્ય દાતા ॥ ૬.૦૨૩.૧૦

વૃષા મદ ઇન્દ્રે શ્લોક ઉક્થા સચા સોમેષુ સુતપા ઋજીષી ।
અર્ચત્ર્યો મઘવા નૃભ્ય ઉક્થૈર્દ્યુક્ષો રાજા ગિરામક્ષિતોતિઃ ॥ ૬.૦૨૪.૦૧
તતુરિર્વીરો નર્યો વિચેતાઃ શ્રોતા હવં ગૃણત ઉર્વ્યૂતિઃ ।
વસુઃ શંસો નરાં કારુધાયા વાજી સ્તુતો વિદથે દાતિ વાજમ્ ॥ ૬.૦૨૪.૦૨
અક્ષો ન ચક્ર્યોઃ શૂર બૃહન્પ્ર તે મહ્ના રિરિચે રોદસ્યોઃ ।
વૃક્ષસ્ય નુ તે પુરુહૂત વયા વ્યૂતયો રુરુહુરિન્દ્ર પૂર્વીઃ ॥ ૬.૦૨૪.૦૩
શચીવતસ્તે પુરુશાક શાકા ગવામિવ સ્રુતયઃ સંચરણીઃ ।
વત્સાનાં ન તન્તયસ્ત ઇન્દ્ર દામન્વન્તો અદામાનઃ સુદામન્ ॥ ૬.૦૨૪.૦૪
અન્યદદ્ય કર્વરમન્યદુ શ્વોઽસચ્ચ સન્મુહુરાચક્રિરિન્દ્રઃ ।
મિત્રો નો અત્ર વરુણશ્ચ પૂષાર્યો વશસ્ય પર્યેતાસ્તિ ॥ ૬.૦૨૪.૦૫
વિ ત્વદાપો ન પર્વતસ્ય પૃષ્ઠાદુક્થેભિરિન્દ્રાનયન્ત યજ્ઞૈઃ ।
તં ત્વાભિઃ સુષ્ટુતિભિર્વાજયન્ત આજિં ન જગ્મુર્ગિર્વાહો અશ્વાઃ ॥ ૬.૦૨૪.૦૬
ન યં જરન્તિ શરદો ન માસા ન દ્યાવ ઇન્દ્રમવકર્શયન્તિ ।

વૃદ્ધસ્ય ચિદ્વર્ધતામસ્ય તનૂઃ સ્તોમેભિરુક્થૈશ્ચ શસ્યમાના ॥ ૬.૦૨૪.૦૭

ન વીળવે નમતે ન સ્થિરાય ન શર્ધતે દસ્યુજૂતાય સ્તવાન્ ।
અજ્રા ઇન્દ્રસ્ય ગિરયશ્ચિદૃષ્વા ગમ્ભીરે ચિદ્ભવતિ ગાધમસ્મૈ ॥ ૬.૦૨૪.૦૮

ગમ્ભીરેણ ન ઉરુણામત્રિન્પ્રેષો યન્ધિ સુતપાવન્વાજાન્ ।
સ્થા ઊ ષુ ઊર્ધ્વ ઊતી અરિષણ્યન્નક્તોર્વ્યુષ્ટૌ પરિતક્મ્યાયામ્ ॥ ૬.૦૨૪.૦૯

સચસ્વ નાયમવસે અભીક ઇતો વા તમિન્દ્ર પાહિ રિષઃ ।
અમા ચૈનમરણ્યે પાહિ રિષો મદેમ શતહિમાઃ સુવીરાઃ ॥ ૬.૦૨૪.૧૦

યા ત ઊતિરવમા યા પરમા યા મધ્યમેન્દ્ર શુષ્મિન્નસ્તિ ।
તાભિરૂ ષુ વૃત્રહત્યેઽવીર્ન એભિશ્ચ વાજૈર્મહાન્ન ઉગ્ર ॥ ૬.૦૨૫.૦૧

આભિઃ સ્પૃધો મિથતીરરિષણ્યન્નમિત્રસ્ય વ્યથયા મન્યુમિન્દ્ર ।
આભિર્વિશ્વા અભિયુજો વિષૂચીરાર્યાય વિશોઽવ તારીર્દાસીઃ ॥ ૬.૦૨૫.૦૨

ઇન્દ્ર જામય ઉત યેઽજામયોઽર્વાચીનાસો વનુષો યુયુજ્રે ।
ત્વમેષાં વિથુરા શવાંસિ જહિ વૃષ્ણ્યાનિ કૃણુહી પરાચઃ ॥ ૬.૦૨૫.૦૩

શૂરો વા શૂરં વનતે શરીરૈસ્તનૂરુચા તરુષિ યત્કૃણ્વૈતે ।
તોકે વા ગોષુ તનયે યદપ્સુ વિ ક્રન્દસી ઉર્વરાસુ બ્રવૈતે ॥ ૬.૦૨૫.૦૪

નહિ ત્વા શૂરો ન તુરો ન ધૃષ્ણુર્ન ત્વા યોધો મન્યમાનો યુયોધ ।
ઇન્દ્ર નકિષ્ટ્વા પ્રત્યસ્ત્યેષાં વિશ્વા જાતાન્યભ્યસિ તાનિ ॥ ૬.૦૨૫.૦૫

સ પત્યત ઉભયોર્નૃમ્ણમયોર્યદી વેધસઃ સમિથે હવન્તે ।
વૃત્રે વા મહો નૃવતિ ક્ષયે વા વ્યચસ્વન્તા યદિ વિતન્તસૈતે ॥ ૬.૦૨૫.૦૬

અધ સ્મા તે ચર્ષણયો યદેજાનિન્દ્ર ત્રાતોત ભવા વરૂતા ।
અસ્માકાસો યે નૃતમાસો અર્ય ઇન્દ્ર સૂરયો દધિરે પુરો નઃ ॥ ૬.૦૨૫.૦૭

અનુ તે દાયિ મહ ઇન્દ્રિયાય સત્રા તે વિશ્વમનુ વૃત્રહત્યે ।
અનુ ક્ષત્રમનુ સહો યજત્રેન્દ્ર દેવેભિરનુ તે નૃષહ્યે ॥ ૬.૦૨૫.૦૮

એવા નઃ સ્પૃધઃ સમજા સમત્સ્વિન્દ્ર રારન્ધિ મિથતીરદેવીઃ ।
વિદ્યામ વસ્તોરવસા ગૃણન્તો ભરદ્વાજા ઉત ત ઇન્દ્ર નૂનમ્ ॥ ૬.૦૨૫.૦૯

શ્રુધી ન ઇન્દ્ર હ્વયામસિ ત્વા મહો વાજસ્ય સાતૌ વાવૃષાણાઃ ।
સં યદ્વિશોઽયન્ત શૂરસાતા ઉગ્રં નોઽવઃ પાર્યે અહન્દાઃ ॥ ૬.૦૨૬.૦૧

ત્વાં વાજી હવતે વાજિનેયો મહો વાજસ્ય ગધ્યસ્ય સાતૌ ।
ત્વાં વૃત્રેષ્વિન્દ્ર સત્પતિં તરુત્રં ત્વાં ચષ્ટે મુષ્ટિહા ગોષુ યુધ્યન્ ॥ ૬.૦૨૬.૦૨

ત્વં કવિં ચોદયોઽર્કસાતૌ ત્વં કુત્સાય શુષ્ણં દાશુષે વર્ક્ ।
ત્વં શિરો અમર્મણઃ પરાહન્નતિથિગ્વાય શંસ્યં કરિષ્યન્ ॥ ૬.૦૨૬.૦૩

ત્વં રથં પ્ર ભરો યોધમૃષ્વમાવો યુધ્યન્તં વૃષભં દશદ્યુમ્ ।
ત્વં તુગ્રં વેતસવે સચાહન્ત્વં તુજિં ગૃણન્તમિન્દ્ર તૂતોઃ ॥ ૬.૦૨૬.૦૪

ત્વં તદુક્થમિન્દ્ર બર્હણા કઃ પ્ર યચ્છતા સહસ્રા શૂર દર્ષિ ।
અવ ગિરેર્દાસં શમ્બરં હન્પ્રાવો દિવોદાસં ચિત્રાભિરૂતી ॥ ૬.૦૨૬.૦૫

ત્વં શ્રદ્ધાભિર્મન્દસાનઃ સોમૈર્દભીતયે ચુમુરિમિન્દ્ર સિષ્વપ્ ।
ત્વં રજિં પિઠીનસે દશસ્યન્ષષ્ટિં સહસ્રા શચ્યા સચાહન્ ॥ ૬.૦૨૬.૦૬

અહં ચન તત્સૂરિભિરાનશ્યાં તવ જ્યાય ઇન્દ્ર સુમ્નમોજઃ ।
ત્વયા યત્સ્તવન્તે સધવીર વીરાસ્ત્રિવરૂથેન નહુષા શવિષ્ઠ ॥ ૬.૦૨૬.૦૭

વયં તે અસ્યામિન્દ્ર દ્યુમ્નહૂતૌ સખાયઃ સ્યામ મહિન પ્રેષ્ઠાઃ ।
પ્રાતર્દનિઃ ક્ષત્રશ્રીરસ્તુ શ્રેષ્ઠો ઘને વૃત્રાણાં સનયે ધનાનામ્ ॥ ૬.૦૨૬.૦૮

કિમસ્ય મદે કિમ્વસ્ય પીતાવિન્દ્રઃ કિમસ્ય સખ્યે ચકાર ।
રણા વા યે નિષદિ કિં તે અસ્ય પુરા વિવિદ્રે કિમુ નૂતનાસઃ ॥ ૬.૦૨૭.૦૧

સદસ્ય મદે સદ્વસ્ય પીતાવિન્દ્રઃ સદસ્ય સખ્યે ચકાર ।
રણા વા યે નિષદિ સત્તે અસ્ય પુરા વિવિદ્રે સદુ નૂતનાસઃ ॥ ૬.૦૨૭.૦૨

નહિ નુ તે મહિમનઃ સમસ્ય ન મઘવન્મઘવત્ત્વસ્ય વિદ્મ ।
ન રાધસોરાધસો નૂતનસ્યેન્દ્ર નકિર્દદૃશ ઇન્દ્રિયં તે ॥ ૬.૦૨૭.૦૩

એતત્ત્યત્ત ઇન્દ્રિયમચેતિ યેનાવધીર્વરશિખસ્ય શેષઃ ।
વજ્રસ્ય યત્તે નિહતસ્ય શુષ્માત્સ્વનાચ્ચિદિન્દ્ર પરમો દદાર ॥ ૬.૦૨૭.૦૪

વધીદિન્દ્રો વરશિખસ્ય શેષોઽભ્યાવર્તિને ચાયમાનાય શિક્ષન્ ।
વૃચીવતો યદ્ધરિયૂપીયાયાં હન્પૂર્વે અર્ધે ભિયસાપરો દર્ત્ ॥ ૬.૦૨૭.૦૫

ત્રિંશચ્છતં વર્મિણ ઇન્દ્ર સાકં યવ્યાવત્યાં પુરુહૂત શ્રવસ્યા ।
વૃચીવન્તઃ શરવે પત્યમાનાઃ પાત્રા ભિન્દાના ન્યર્થાન્યાયન્ ॥ ૬.૦૨૭.૦૬

યસ્ય ગાવાવરુષા સૂયવસ્યૂ અન્તરૂ ષુ ચરતો રેરિહાણા ।

સ સૃઞ્જયાય તુર્વશં પરાદાદ્વૃચીવતો દૈવવાતાય શિક્ષન્ ॥ ૬.૦૨૭.૦૭
દ્વયાઁ અગ્ને રથિનો વિંશતિં ગા વધૂમતો મઘવા મહ્યં સમ્રાટ્ ।
અભ્યાવર્તી ચાયમાનો દદાતિ દૂણાશેયં દક્ષિણા પાર્થવાનામ્ ॥ ૬.૦૨૭.૦૮

આ ગાવો અગ્મન્નુત ભદ્રમક્રન્સીદન્તુ ગોષ્ઠે રણયન્ત્વસ્મે ।
પ્રજાવતીઃ પુરુરૂપા ઇહ સ્યુરિન્દ્રાય પૂર્વીરુષસો દુહાનાઃ ॥ ૬.૦૨૮.૦૧
ઇન્દ્રો યજ્વને પૃણતે ચ શિક્ષત્યુપેદ્દદાતિ ન સ્વં મુષાયતિ ।
ભૂયોભૂયો રયિમિદસ્ય વર્ધયન્નભિન્ને ખિલ્યે નિ દધાતિ દેવયુમ્ ॥ ૬.૦૨૮.૦૨
ન તા નશન્તિ ન દભાતિ તસ્કરો નાસામામિત્રો વ્યથિરા દધર્ષતિ ।
દેવાઁશ્ચ યાભિર્યજતે દદાતિ ચ જ્યોગિત્તાભિઃ સચતે ગોપતિઃ સહ ॥ ૬.૦૨૮.૦૩
ન તા અર્વા રેણુકકાટો અશ્નુતે ન સંસ્કૃતત્રમુપ યન્તિ તા અભિ ।
ઉરુગાયમભયં તસ્ય તા અનુ ગાવો મર્તસ્ય વિ ચરન્તિ યજ્વનઃ ॥ ૬.૦૨૮.૦૪
ગાવો ભગો ગાવ ઇન્દ્રો મે અચ્છાન્ગાવઃ સોમસ્ય પ્રથમસ્ય ભક્ષઃ ।
ઇમા યા ગાવઃ સ જનાસ ઇન્દ્ર ઇચ્છામીદ્ધૃદા મનસા ચિદિન્દ્રમ્ ॥ ૬.૦૨૮.૦૫
યૂયં ગાવો મેદયથા કૃશં ચિદશ્રીરં ચિત્કૃણુથા સુપ્રતીકમ્ ।
ભદ્રં ગૃહં કૃણુથ ભદ્રવાચો બૃહદ્વો વય ઉચ્યતે સભાસુ ॥ ૬.૦૨૮.૦૬
પ્રજાવતીઃ સૂયવસં રિશન્તીઃ શુદ્ધા અપઃ સુપ્રપાણે પિબન્તીઃ ।
મા વઃ સ્તેન ઈશત માઘશંસઃ પરિ વો હેતી રુદ્રસ્ય વૃજ્યાઃ ॥ ૬.૦૨૮.૦૭
ઉપેદમુપપર્ચનમાસુ ગોષૂપ પૃચ્યતામ્ ।
ઉપ ઋષભસ્ય રેતસ્યુપેન્દ્ર તવ વીર્યે ॥ ૬.૦૨૮.૦૮

ઇન્દ્રં વો નરઃ સખ્યાય સેપુર્મહો યન્તઃ સુમતયે ચકાનાઃ ।
મહો હિ દાતા વજ્રહસ્તો અસ્તિ મહામુ રણ્વમવસે યજધ્વમ્ ॥ ૬.૦૨૯.૦૧
આ યસ્મિન્હસ્તે નર્યા મિમિક્ષુરા રથે હિરણ્યયે રથેષ્ઠાઃ ।
આ રશ્મયો ગભસ્ત્યોઃ સ્થૂરયોરાધ્વન્નશ્વાસો વૃષણો યુજાનાઃ ॥ ૬.૦૨૯.૦૨
શ્રિયે તે પાદા દુવ આ મિમિક્ષુર્ધૃષ્ણુર્વજ્રી શવસા દક્ષિણાવાન્ ।
વસાનો અત્કં સુરભિં દૃશે કં સ્વ૧ર્ણ નૃતવિષિરો બભૂથ ॥ ૬.૦૨૯.૦૩
સ સોમ આમિશ્લતમઃ સુતો ભૂદ્યસ્મિન્પક્તિઃ પચ્યતે સન્તિ ધાનાઃ ।
ઇન્દ્રં નરઃ સ્તુવન્તો બ્રહ્મકારા ઉક્થા શંસન્તો દેવવાતતમાઃ ॥ ૬.૦૨૯.૦૪

ન તે અન્તઃ શવસો ધાય્યસ્ય વિ તુ બાબધે રોદસી મહિત્વા ।
આ તા સૂરિઃ પૃણતિ તૂતુજાનો યૂથેવાપ્સુ સમીજમાન ઊતી ॥ ૬.૦૨૯.૦૫

એવેદિન્દ્રઃ સુહવ ઋષ્વો અસ્તૂતી અનૂતી હિરિશિપ્રઃ સત્વા ।
એવા હિ જાતો અસમાત્યોજાઃ પુરૂ ચ વૃત્રા હનતિ નિ દસ્યૂન્ ॥ ૬.૦૨૯.૦૬

ભૂય ઇદ્વાવૃધે વીર્યાયઁ એકો અજુર્યો દયતે વસૂનિ ।
પ્ર રિરિચે દિવ ઇન્દ્રઃ પૃથિવ્યા અર્ધમિદસ્ય પ્રતિ રોદસી ઉભે ॥ ૬.૦૩૦.૦૧

અધા મન્યે બૃહદસુર્યમસ્ય યાનિ દાધાર નકિરા મિનાતિ ।
દિવેદિવે સૂર્યો દર્શતો ભૂદ્વિ સદ્માન્યુર્વિયા સુક્રતુર્ધાત્ ॥ ૬.૦૩૦.૦૨

અદ્યા ચિન્નૂ ચિત્તદપો નદીનાં યદાભ્યો અરદો ગાતુમિન્દ્ર ।
નિ પર્વતા અદ્મસદો ન સેદુસ્ત્વયા દૃળ્હાનિ સુક્રતો રજાંસિ ॥ ૬.૦૩૦.૦૩

સત્યમિત્તન્ન ત્વાવાઁ અન્યો અસ્તીન્દ્ર દેવો ન મર્ત્યો જ્યાયાન્ ।
અહન્નહિં પરિશયાનમર્ણોઽવાસૃજો અપો અચ્છા સમુદ્રમ્ ॥ ૬.૦૩૦.૦૪

ત્વમપો વિ દુરો વિષૂચીરિન્દ્ર દૃળ્હમરુજઃ પર્વતસ્ય ।
રાજાભવો જગતશ્ચર્ષણીનાં સાકં સૂર્યં જનયન્દ્યામુષાસમ્ ॥ ૬.૦૩૦.૦૫

અભૂરેકો રયિપતે રયીણામા હસ્તયોરધિથા ઇન્દ્ર કૃષ્ટીઃ ।
વિ તોકે અપ્સુ તનયે ચ સૂરેઽવોચન્ત ચર્ષણયો વિવાચઃ ॥ ૬.૦૩૧.૦૧

ત્વદ્ભિયેન્દ્ર પાર્થિવાનિ વિશ્વાચ્યુતા ચિચ્ચ્યાવયન્તે રજાંસિ ।
દ્યાવાક્ષામા પર્વતાસો વનાનિ વિશ્વં દૃળ્હં ભયતે અજ્મન્ના તે ॥ ૬.૦૩૧.૦૨

ત્વં કુત્સેનાભિ શુષ્ણમિન્દ્રાશુષં યુધ્ય કુયવં ગવિષ્ટૌ ।
દશ પ્રપિત્વે અધ સૂર્યસ્ય મુષાયશ્ચક્રમવિવે રપાંસિ ॥ ૬.૦૩૧.૦૩

ત્વં શતાન્યવ શમ્બરસ્ય પુરો જઘન્થાપ્રતીનિ દસ્યોઃ ।
અશિક્ષો યત્ર શચ્યા શચીવો દિવોદાસાય સુન્વતે સુતક્રે ભરદ્વાજાય ગૃણતે વસૂનિ ॥ ૬.૦૩૧.૦૪

સ સત્યસત્વન્મહતે રણાય રથમા તિષ્ઠ તુવિનૃમ્ણ ભીમમ્ ।
યાહિ પ્રપથિન્નવસોપ મદ્રિક્પ્ર ચ શ્રુત શ્રાવય ચર્ષણિભ્યઃ ॥ ૬.૦૩૧.૦૫

અપૂર્વ્યા પુરુતમાન્યસ્મૈ મહે વીરાય તવસે તુરાય ।
વિરપ્શિને વજ્રિણે શંતમાનિ વચાંસ્યાસા સ્થવિરાય તક્ષમ્ ॥ ૬.૦૩૨.૦૧

સ માતરા સૂર્યેણા કવીનામવાસયદ્રુજદદ્રિં ગૃણાનઃ ।

સ્વાધીભિરૃક્વભિર્વાવશાન ઉદુસ્રિયાણામસૃજન્નિદાનમ્ ॥ ૬.૦૩૨.૦૨
સ વહ્નિભિરૃક્વભિર્ગોષુ શશ્વન્મિતજ્ઞુભિઃ પુરુકૃત્વા જિગાય ।
પુરઃ પુરોહા સખિભિઃ સખીયન્દૃળ્હા રુરોજ કવિભિઃ કવિઃ સન્ ॥ ૬.૦૩૨.૦૩
સ નીવ્યાભિર્જરિતારમચ્છા મહો વાજેભિર્મહદ્ભિશ્ચ શુષ્મૈઃ ।
પુરુવીરાભિર્વૃષભ ક્ષિતીનામા ગિર્વણઃ સુવિતાય પ્ર યાહિ ॥ ૬.૦૩૨.૦૪
સ સર્ગેણ શવસા તક્તો અત્યૈરપ ઇન્દ્રો દક્ષિણતસ્તુરાષાટ્ ।
ઇત્થા સૃજાના અનપાવૃદર્થં દિવેદિવે વિવિષુરપ્રમૃષ્યમ્ ॥ ૬.૦૩૨.૦૫

ય ઓજિષ્ઠ ઇન્દ્ર તં સુ નો દા મદો વૃષન્સ્વભિષ્ટિર્દાસ્વાન્ ।
સૌવશ્વ્યં યો વનવત્સ્વશ્વો વૃત્રા સમત્સુ સાસહદમિત્રાન્ ॥ ૬.૦૩૩.૦૧
ત્વાં હીઉન્દ્રાવસે વિવાચો હવન્તે ચર્ષણયઃ શૂરસાતૌ ।
ત્વં વિપ્રેભિર્વિ પણીઁરશાયસ્ત્વોત ઇત્સનિતા વાજમર્વા ॥ ૬.૦૩૩.૦૨
ત્વં તાઁ ઇન્દ્રોભયા◌ઁ અમિત્રાન્દાસા વૃત્રાણ્યાર્યા ચ શૂર ।
વધીર્વનેવ સુધિતેભિરત્કૈરા પૃત્સુ દર્ષિ નૃણાં નૃતમ ॥ ૬.૦૩૩.૦૩
સ ત્વં ન ઇન્દ્રાકવાભિરૂતી સખા વિશ્વાયુરવિતા વૃધે ભૂઃ ।
સ્વર્ષાતા યદ્ધ્વયામસિ ત્વા યુધ્યન્તો નેમધિતા પૃત્સુ શૂર ॥ ૬.૦૩૩.૦૪
નૂનં ન ઇન્દ્રાપરાય ચ સ્યા ભવા મૃળીક ઉત નો અભિષ્ટૌ ।
ઇત્થા ગૃણન્તો મહિનસ્ય શર્મન્દિવિ ષ્યામ પાર્યે ગોષતમાઃ ॥ ૬.૦૩૩.૦૫

સં ચ ત્વે જગ્મુર્ગિર ઇન્દ્ર પૂર્વીર્વિ ચ ત્વદ્યન્તિ વિભ્વો મનીષાઃ ।
પુરા નૂનં ચ સ્તુતય ઋષીણાં પસ્પૃધ્ર ઇન્દ્રે અધ્યુક્થાર્કા ॥ ૬.૦૩૪.૦૧
પુરુહૂતો યઃ પુરુગૂર્ત ઋભ્વા◌ઁ એકઃ પુરુપ્રશસ્તો અસ્તિ યજ્ઞૈઃ ।
રથો ન મહે શવસે યુજાનોઽસ્માભિરિન્દ્રો અનુમાદ્યો ભૂત્ ॥ ૬.૦૩૪.૦૨
ન યં હિંસન્તિ ધીતયો ન વાણીરિન્દ્રં નક્ષન્તીદભિ વર્ધયન્તીઃ ।
યદિ સ્તોતારઃ શતં યત્સહસ્રં ગૃણન્તિ ગિર્વણસં શં તદસ્મૈ ॥ ૬.૦૩૪.૦૩
અસ્મા એતદ્દિવ્યર્ચેવ માસા મિમિક્ષ ઇન્દ્રે ન્યયામિ સોમઃ ।
જનં ન ધન્વન્નભિ સં યદાપઃ સત્રા વાવૃધુર્હવનાનિ યજ્ઞૈઃ ॥ ૬.૦૩૪.૦૪
અસ્મા એતન્મહ્યાઙ્ગૂષમસ્મા ઇન્દ્રાય સ્તોત્રં મતિભિરવાચિ ।
અસદ્યથા મહતિ વૃત્રતૂર્યે ઇન્દ્રો વિશ્વાયુરવિતા વૃધશ્ચ ॥ ૬.૦૩૪.૦૫

કદા ભુવન્રથક્ષયાણિ બ્રહ્મ કદા સ્તોત્રે સહસ્રપોષ્યં દાઃ ।
કદા સ્તોમં વાસયોઽસ્ય રાયા કદા ધિયઃ કરસિ વાજરત્નાઃ ॥ ૬.૦૩૫.૦૧

કર્હિ સ્વિત્તદિન્દ્ર યન્નૃભિર્નૄન્વીરૈર્વીરાન્નીળયાસે જયાજીન્ ।
ત્રિધાતુ ગા અધિ જયાસિ ગોષ્વિન્દ્ર દ્યુમ્નં સ્વર્વદ્ધેહ્યસ્મે ॥ ૬.૦૩૫.૦૨

કર્હિ સ્વિત્તદિન્દ્ર યજ્જરિત્રે વિશ્વપ્સુ બ્રહ્મ કૃણવઃ શવિષ્ઠ ।
કદા ધિયો ન નિયુતો યુવાસે કદા ગોમઘા હવનાનિ ગચ્છાઃ ॥ ૬.૦૩૫.૦૩

સ ગોમઘા જરિત્રે અશ્વશ્ચન્દ્રા વાજશ્રવસો અધિ ધેહિ પૃક્ષઃ ।
પીપિહીષઃ સુદુઘામિન્દ્ર ધેનું ભરદ્વાજેષુ સુરુચો રુરુચ્યાઃ ॥ ૬.૦૩૫.૦૪

તમા નૂનં વૃજનમન્યથા ચિચ્છૂરો યચ્છક્ર વિ દુરો ગૃણીષે ।
મા નિરરં શુક્રદુઘસ્ય ધેનોરાઙ્ગિરસાન્બ્રહ્મણા વિપ્ર જિન્વ ॥ ૬.૦૩૫.૦૫

સત્રા મદાસસ્તવ વિશ્વજન્યાઃ સત્રા રાયોઽધ યે પાર્થિવાસઃ ।
સત્રા વાજાનામભવો વિભક્તા યદ્દેવેષુ ધારયથા અસુર્યમ્ ॥ ૬.૦૩૬.૦૧

અનુ પ્ર યેજે જન ઓજો અસ્ય સત્રા દધિરે અનુ વીર્યાય ।
સ્યૂમગૃભે દુધયેઽર્વતે ચ ક્રતું વૃઞ્જન્ત્યપિ વૃત્રહત્યે ॥ ૬.૦૩૬.૦૨

તં સધ્રીચીરૂતયો વૃષ્ણ્યાનિ પૌંસ્યાનિ નિયુતઃ સશ્ચુરિન્દ્રમ્ ।
સમુદ્રં ન સિન્ધવ ઉક્થશુષ્મા ઉરુવ્યચસં ગિર આ વિશન્તિ ॥ ૬.૦૩૬.૦૩

સ રાયસ્ખામુપ સૃજા ગૃણાનઃ પુરુશ્ચન્દ્રસ્ય ત્વમિન્દ્ર વસ્વઃ ।
પતિર્બભૂથાસમો જનાનામેકો વિશ્વસ્ય ભુવનસ્ય રાજા ॥ ૬.૦૩૬.૦૪

સ તુ શ્રુધિ શ્રુત્યા યો દુવોયુર્દ્યૌર્ન ભૂમાભિ રાયો અર્યઃ ।
અસો યથા નઃ શવસા ચકાનો યુગેયુગે વયસા ચેકિતાનઃ ॥ ૬.૦૩૬.૦૫

અર્વાગ્રથં વિશ્વવારં ત ઉગ્રેન્દ્ર યુક્તાસો હરયો વહન્તુ ।
કીરિશ્ચિદ્ધિ ત્વા હવતે સ્વર્વાનૃધીમહિ સધમાદસ્તે અદ્ય ॥ ૬.૦૩૭.૦૧

પ્રો દ્રોણે હરયઃ કર્માગ્મન્પુનાનાસ ઋજ્યન્તો અભૂવન્ ।
ઇન્દ્રો નો અસ્ય પૂર્વ્યઃ પપીયાદ્દ્યુક્ષો મદસ્ય સોમ્યસ્ય રાજા ॥ ૬.૦૩૭.૦૨

આસસ્રાણાસઃ શવસાનમચ્છેન્દ્રં સુચક્રે રથ્યાસો અશ્વાઃ ।
અભિ શ્રવ ઋજ્યન્તો વહેયુર્નૂ ચિન્નુ વાયોરમૃતં વિ દસ્યેત્ ॥ ૬.૦૩૭.૦૩

વરિષ્ઠો અસ્ય દક્ષિણામિયર્તીન્દ્રો મઘોનાં તુવિકૂર્મિતમઃ ।

યયા વજ્રિવઃ પરિયાસ્યંહો મઘા ચ ધૃષ્ણો દયસે વિ સૂરીન્ ॥ ૬.૦૩૭.૦૪
ઇન્દ્રો વાજસ્ય સ્થવિરસ્ય દાતેન્દ્રો ગીર્ભિર્વર્ધતાં વૃદ્ધમહાઃ ।
ઇન્દ્રો વૃત્રં હનિષ્ઠો અસ્તુ સત્વા તા સૂરિઃ પૃણતિ તૂતુજાનઃ ॥ ૬.૦૩૭.૦૫
અપાદિત ઉદુ નશ્ચિત્રતમો મહીં ભર્ષદ્દ્યુમતીમિન્દ્રહૂતિમ્ ।
પન્યસીં ધીતિં દૈવ્યસ્ય યામઞ્જનસ્ય રાતિં વનતે સુદાનુઃ ॥ ૬.૦૩૮.૦૧
દૂરાચ્ચિદા વસતો અસ્ય કર્ણા ઘોષાદિન્દ્રસ્ય તન્યતિ બ્રુવાણઃ ।
એયમેનં દેવહૂતિર્વવૃત્યાન્મદ્ર્યગિન્દ્રમિયમૃચ્યમાના ॥ ૬.૦૩૮.૦૨
તં વો ધિયા પરમયા પુરાજામજરમિન્દ્રમભ્યનૂષ્યર્કૈઃ ।
બ્રહ્મા ચ ગિરો દધિરે સમસ્મિન્મહાઁશ્ચ સ્તોમો અધિ વર્ધદિન્દ્રે ॥ ૬.૦૩૮.૦૩
વર્ધાદ્યં યજ્ઞ ઉત સોમ ઇન્દ્રં વર્ધાદ્બ્રહ્મ ગિર ઉક્થા ચ મન્મ ।
વર્ધાહૈનમુષસો યામન્નક્તોર્વર્ધાન્માસાઃ શરદો દ્યાવ ઇન્દ્રમ્ ॥ ૬.૦૩૮.૦૪
એવા જજ્ઞાનં સહસે અસામિ વાવૃધાનં રાધસે ચ શ્રુતાય ।
મહામુગ્રમવસે વિપ્ર નૂનમા વિવાસેમ વૃત્રતૂર્યેષુ ॥ ૬.૦૩૮.૦૫
મન્દ્રસ્ય કવેર્દિવ્યસ્ય વહ્નેર્વિપ્રમન્મનો વચનસ્ય મધ્વઃ ।
અપા નસ્તસ્ય સચનસ્ય દેવેષો યુવસ્વ ગૃણતે ગોઅગ્રાઃ ॥ ૬.૦૩૯.૦૧
અયમુશાનઃ પર્યદ્રિમુસ્રા ઋતધીતિભિરૃતયુગ્યુજાનઃ ।
રુજદરુગ્ણં વિ વલસ્ય સાનું પણીઁર્વચોભિરભિ યોધદિન્દ્રઃ ॥ ૬.૦૩૯.૦૨
અયં દ્યોતયદદ્યુતો વ્યક્તૂન્દોષા વસ્તોઃ શરદ ઇન્દુરિન્દ્ર ।
ઇમં કેતુમદધુર્નૂ ચિદહ્નાં શુચિજન્મન ઉષસશ્ચકાર ॥ ૬.૦૩૯.૦૩
અયં રોચયદરુચો રુચાનોઽયં વાસયદ્વ્યૃતેન પૂર્વીઃ ।
અયમીયત ઋતયુગ્ભિરશ્વૈઃ સ્વર્વિદા નાભિના ચર્ષણિપ્રાઃ ॥ ૬.૦૩૯.૦૪
નૂ ગૃણાનો ગૃણતે પ્રત્ન રાજન્નિષઃ પિન્વ વસુદેયાય પૂર્વીઃ ।
અપ ઓષધીરવિષા વનાનિ ગા અર્વતો નૄનૃચસે રિરીહિ ॥ ૬.૦૩૯.૦૫
ઇન્દ્ર પિબ તુભ્યં સુતો મદાયાવ સ્ય હરી વિ મુચા સખાયા ।
ઉત પ્ર ગાય ગણ આ નિષદ્યાથા યજ્ઞાય ગૃણતે વયો ધાઃ ॥ ૬.૦૪૦.૦૧
અસ્ય પિબ યસ્ય જજ્ઞાન ઇન્દ્ર મદાય ક્રત્વે અપિબો વિરપ્શિન્ ।
તમુ તે ગાવો નર આપો અદ્રિરિન્દું સમહ્યન્પીતયે સમસ્મૈ ॥ ૬.૦૪૦.૦૨

સમિદ્ધે અગ્નૌ સુત ઇન્દ્ર સોમ આ ત્વા વહન્તુ હરયો વહિષ્ઠાઃ ।
ત્વાયતા મનસા જોહવીમીન્દ્રા યાહિ સુવિતાય મહે નઃ ॥ ૬.૦૪૦.૦૩

આ યાહિ શશ્વદુશતા યયાથેન્દ્ર મહા મનસા સોમપેયમ્ ।
ઉપ બ્રહ્માણિ શ◌ૃણવ ઇમા નોઽથા તે યજ્ઞસ્તન્વેઽ વયો ધાત્ ॥ ૬.૦૪૦.૦૪

યદિન્દ્ર દિવિ પાર્યે યદૃધગ્યદ્વા સ્વે સદને યત્ર વાસિ ।
અતો નો યજ્ઞમવસે નિયુત્વાન્સજોષાઃ પાહિ ગિર્વણો મરુદ્ભિઃ ॥ ૬.૦૪૦.૦૫

અહેળમાન ઉપ યાહિ યજ્ઞં તુભ્યં પવન્ત ઇન્દવઃ સુતાસઃ ।
ગાવો ન વજ્રિન્સ્વમોકો અચ્છેન્દ્રા ગહિ પ્રથમો યજ્ઞિયાનામ્ ॥ ૬.૦૪૧.૦૧

યા તે કાકુત્સુકૃતા યા વરિષ્ઠા યયા શશ્વત્પિબસિ મધ્વ ઊર્મિમ્ ।
તયા પાહિ પ્ર તે અધ્વર્યુરસ્થાત્સં તે વજ્રો વર્તતામિન્દ્ર ગવ્યુઃ ॥ ૬.૦૪૧.૦૨

એષ દ્રપ્સો વૃષભો વિશ્વરૂપ ઇન્દ્રાય વૃષ્ણે સમકારિ સોમઃ ।
એતં પિબ હરિવઃ સ્થાતરુગ્ર યસ્યેશિષે પ્રદિવિ યસ્તે અન્નમ્ ॥ ૬.૦૪૧.૦૩

સુતઃ સોમો અસુતાદિન્દ્ર વસ્યાનયં શ્રેયાઞ્ચિકિતુષે રણાય ।
એતં તિતિર્વ ઉપ યાહિ યજ્ઞં તેન વિશ્વાસ્તવિષીરા પૃણસ્વ ॥ ૬.૦૪૧.૦૪

હ્વયામસિ ત્વેન્દ્ર યાહ્યર્વાઙરં તે સોમસ્તન્વે ભવાતિ ।
શતક્રતો માદયસ્વા સુતેષુ પ્રાસ્માઁ અવ પૃતનાસુ પ્ર વિક્ષુ ॥ ૬.૦૪૧.૦૫

પ્રત્યસ્મૈ પિપીષતે વિશ્વાનિ વિદુષે ભર ।
અરંગમાય જગ્મયેઽપશ્ચાદ્દધ્વને નરે ॥ ૬.૦૪૨.૦૧

એમેનં પ્રત્યેતન સોમેભિઃ સોમપાતમમ્ ।
અમત્રેભિરૃજીષિણમિન્દ્રં સુતેભિરિન્દુભિઃ ॥ ૬.૦૪૨.૦૨

યદી સુતેભિરિન્દુભિઃ સોમેભિઃ પ્રતિભૂષથ ।
વેદા વિશ્વસ્ય મેધિરો ધૃષત્તંતમિદેષતે ॥ ૬.૦૪૨.૦૩

અસ્માઅસ્મા ઇદન્ધસોઽધ્વર્યો પ્ર ભરા સુતમ્ ।
કુવિત્સમસ્ય જેન્યસ્ય શર્ધતોઽભિશસ્તેરવસ્પરત્ ॥ ૬.૦૪૨.૦૪

યસ્ય ત્યચ્છમ્બરં મદે દિવોદાસાય રન્ધયઃ ।
અયં સ સોમ ઇન્દ્ર તે સુતઃ પિબ ॥ ૬.૦૪૩.૦૧

યસ્ય તીવ્રસુતં મદં મધ્યમન્તં ચ રક્ષસે ।

અયં સ સોમ ઇન્દ્ર તે સુતઃ પિબ ॥ ૬.૦૪૩.૦૨
યસ્ય ગા અન્તરશ્મનો મદે દૃળ્હા અવાસૃજઃ ।
અયં સ સોમ ઇન્દ્ર તે સુતઃ પિબ ॥ ૬.૦૪૩.૦૩
યસ્ય મન્દાનો અન્ધસો માઘોનં દધિષે શવઃ ।
અયં સ સોમ ઇન્દ્ર તે સુતઃ પિબ ॥ ૬.૦૪૩.૦૪
યો રયિવો રયિંતમો યો દ્યુમ્નૈર્દ્યુમ્નવત્તમઃ ।
સોમઃ સુતઃ સ ઇન્દ્ર તેઽસ્તિ સ્વધાપતે મદઃ ॥ ૬.૦૪૪.૦૧
યઃ શગ્મસ્તુવિશગ્મ તે રાયો દામા મતીનામ્ ।
સોમઃ સુતઃ સ ઇન્દ્ર તેઽસ્તિ સ્વધાપતે મદઃ ॥ ૬.૦૪૪.૦૨
યેન વૃદ્ધો ન શવસા તુરો ન સ્વાભિરૂતિભિઃ ।
સોમઃ સુતઃ સ ઇન્દ્ર તેઽસ્તિ સ્વધાપતે મદઃ ॥ ૬.૦૪૪.૦૩
ત્યમુ વો અપ્રહણં ગૃણીષે શવસસ્પતિમ્ ।
ઇન્દ્રં વિશ્વાસાહં નરં મંહિષ્ઠં વિશ્વચર્ષણિમ્ ॥ ૬.૦૪૪.૦૪
યં વર્ધયન્તીદ્ગિરઃ પતિં તુરસ્ય રાધસઃ ।
તમિન્ન્વસ્ય રોદસી દેવી શુષ્મં સપર્યતઃ ॥ ૬.૦૪૪.૦૫
તદ્વ ઉક્થસ્ય બર્હણેન્દ્રાયોપસ્તૃણીષણિ ।
વિપો ન યસ્યોતયો વિ યદ્રોહન્તિ સક્ષિતઃ ॥ ૬.૦૪૪.૦૬
અવિદદ્દક્ષં મિત્રો નવીયાન્પપાનો દેવેભ્યો વસ્યો અચૈત્ ।
સસવાન્સ્તૌલાભિર્ધૌતરીભિરુરુષ્યા પાયુરભવત્સખિભ્યઃ ॥ ૬.૦૪૪.૦૭
ઋતસ્ય પથિ વેધા અપાયિ શ્રિયે મનાંસિ દેવાસો અક્રન્ ।
દધાનો નામ મહો વચોભિર્વપુર્દૃશયે વેન્યો વ્યાવઃ ॥ ૬.૦૪૪.૦૮
દ્યુમત્તમં દક્ષં ધેહ્યસ્મે સેધા જનાનાં પૂર્વીરરાતીઃ ।
વર્ષીયો વયઃ કૃણુહિ શચીભિર્ધનસ્ય સાતાવસ્માઁ અવિડ્ઢિ ॥ ૬.૦૪૪.૦૯
ઇન્દ્ર તુભ્યમિન્મઘવન્નભૂમ વયં દાત્રે હરિવો મા વિ વેનઃ ।
નકિરાપિર્દદૃશે મર્ત્યત્રા કિમઙ્ગ રધ્રચોદનં ત્વાહુઃ ॥ ૬.૦૪૪.૧૦
મા જસ્વને વૃષભ નો રરીથા મા તે રેવતઃ સખ્યે રિષામ ।
પૂર્વીષ્ટ ઇન્દ્ર નિષ્ષિધો જનેષુ જહ્યસુષ્વીન્પ્ર વૃહાપૃણતઃ ॥ ૬.૦૪૪.૧૧

ઉદભ્રાણીવ સ્તનયન્નિયર્તીન્દ્રો રાધાંસ્યશ્વ્યાનિ ગવ્યા ।
ત્વમસિ પ્રદિવઃ કારુધાયા મા ત્વાદામાન આ દભન્મઘોનઃ ॥ ૬.૦૪૪.૧૨
અધ્વર્યો વીર પ્ર મહે સુતાનામિન્દ્રાય ભર સ હ્યસ્ય રાજા ।
યઃ પૂર્વ્યાભિરુત નૂતનાભિર્ગીર્ભિર્વાવૃધે ગૃણતામૃષીણામ્ ॥ ૬.૦૪૪.૧૩
અસ્ય મદે પુરુ વર્પાંસિ વિદ્વાનિન્દ્રો વૃત્રાણ્યપ્રતી જઘાન ।
તમુ પ્ર હોષિ મધુમન્તમસ્મૈ સોમં વીરાય શિપ્રિણે પિબધ્યૈ ॥ ૬.૦૪૪.૧૪
પાતા સુતમિન્દ્રો અસ્તુ સોમં હન્તા વૃત્રં વજ્રેણ મન્દસાનઃ ।
ગન્તા યજ્ઞં પરાવતશ્ચિદચ્છા વસુર્ધીનામવિતા કારુધાયાઃ ॥ ૬.૦૪૪.૧૫
ઇદં ત્યત્પાત્રમિન્દ્રપાનમિન્દ્રસ્ય પ્રિયમમૃતમપાયિ ।
મત્સદ્યથા સૌમનસાય દેવં વ્ય૧સ્મદ્દ્વેષો યુયવદ્વ્યંહઃ ॥ ૬.૦૪૪.૧૬
એના મન્દાનો જહિ શૂર શત્રૂઞ્જામિમજામિં મઘવન્નમિત્રાન્ ।
અભિષેણાઁ અભ્યાઉદેદિશાનાન્પરાચ ઇન્દ્ર પ્ર મૃણા જહી ચ ॥ ૬.૦૪૪.૧૭
આસુ ષ્મા ણો મઘવન્નિન્દ્ર પૃત્સ્વ૧સ્મભ્યં મહિ વરિવઃ સુગં કઃ ।
અપાં તોકસ્ય તનયસ્ય જેષ ઇન્દ્ર સૂરીન્કૃણુહિ સ્મા નો અર્ધમ્ ॥ ૬.૦૪૪.૧૮
આ ત્વા હરયો વૃષણો યુજાના વૃષરથાસો વૃષરશ્મયોઽત્યાઃ ।
અસ્મત્રાઞ્ચો વૃષણો વજ્રવાહો વૃષ્ણે મદાય સુયુજો વહન્તુ ॥ ૬.૦૪૪.૧૯
આ તે વૃષન્વૃષણો દ્રોણમસ્થુર્ઘૃતપ્રુષો નોર્મયો મદન્તઃ ।
ઇન્દ્ર પ્ર તુભ્યં વૃષભિઃ સુતાનાં વૃષ્ણે ભરન્તિ વૃષભાય સોમમ્ ॥ ૬.૦૪૪.૨૦
વૃષાસિ દિવો વૃષભઃ પૃથિવ્યા વૃષા સિન્ધૂનાં વૃષભઃ સ્તિયાનામ્ ।
વૃષ્ણે ત ઇન્દુર્વૃષભ પીપાય સ્વાદૂ રસો મધુપેયો વરાય ॥ ૬.૦૪૪.૨૧
અયં દેવઃ સહસા જાયમાન ઇન્દ્રેણ યુજા પણિમસ્તભાયત્ ।
અયં સ્વસ્ય પિતુરાયુધાનીન્દુરમુષ્ણાદશિવસ્ય માયાઃ ॥ ૬.૦૪૪.૨૨
અયમકૃણોદુષસઃ સુપત્નીરયં સૂર્યે અદધાજ્જ્યોતિરન્તઃ ।
અયં ત્રિધાતુ દિવિ રોચનેષુ ત્રિતેષુ વિન્દદમૃતં નિગૂળ્હમ્ ॥ ૬.૦૪૪.૨૩
અયં દ્યાવાપૃથિવી વિ ષ્કભાયદયં રથમયુનક્સપ્તરશ્મિમ્ ।
અયં ગોષુ શચ્યા પક્વમન્તઃ સોમો દાધાર દશયન્ત્રમુત્સમ્ ॥ ૬.૦૪૪.૨૪
ય આનયત્પરાવતઃ સુનીતી તુર્વશં યદુમ્ ।

ઇન્દ્રઃ સ નો યુવા સખા ॥ ૬.૦૪૫.૦૧

અવિપ્રે ચિદ્વયો દધદનાશુના ચિદર્વતા ।

ઇન્દ્રો જેતા હિતં ધનમ્ ॥ ૬.૦૪૫.૦૨

મહીરસ્ય પ્રણીતયઃ પૂર્વીરુત પ્રશસ્તયઃ ।

નાસ્ય ક્ષીયન્ત ઊતયઃ ॥ ૬.૦૪૫.૦૩

સખાયો બ્રહ્મવાહસેઽર્ચત પ્ર ચ ગાયત ।

સ હિ નઃ પ્રમતિર્મહી ॥ ૬.૦૪૫.૦૪

ત્વમેકસ્ય વૃત્રહન્નવિતા દ્વયોરસિ ।

ઉતેદૃશે યથા વયમ્ ॥ ૬.૦૪૫.૦૫

નયસીદ્વતિ દ્વિષઃ કૃણોષ્યુક્થશંસિનઃ ।

નૃભિઃ સુવીર ઉચ્યસે ॥ ૬.૦૪૫.૦૬

બ્રહ્માણં બ્રહ્મવાહસં ગીર્ભિઃ સખાયમૃગ્મિયમ્ ।

ગાં ન દોહસે હુવે ॥ ૬.૦૪૫.૦૭

યસ્ય વિશ્વાનિ હસ્તયોરૂચુર્વસૂનિ નિ દ્વિતા ।

વીરસ્ય પૃતનાષહઃ ॥ ૬.૦૪૫.૦૮

વિ દૃળ્હાનિ ચિદદ્રિવો જનાનાં શચીપતે ।

વૃહ માયા અનાનત ॥ ૬.૦૪૫.૦૯

તમુ ત્વા સત્ય સોમપા ઇન્દ્ર વાજાનાં પતે ।

અહૂમહિ શ્રવસ્યવઃ ॥ ૬.૦૪૫.૧૦

તમુ ત્વા યઃ પુરાસિથ યો વા નૂનં હિતે ધને ।

હવ્યઃ સ શ્રુધી હવમ્ ॥ ૬.૦૪૫.૧૧

ધીભિરર્વદ્ભિરર્વતો વાજાँ ઇન્દ્ર શ્રવાય્યાન્ ।

ત્વયા જેષ્મ હિતં ધનમ્ ॥ ૬.૦૪૫.૧૨

અભૂરુ વીર ગિર્વણો મહાँ ઇન્દ્ર ધને હિતે ।

ભરે વિતન્તસાય્યઃ ॥ ૬.૦૪૫.૧૩

યા ત ઊતિરમિત્રહન્મક્ષૂજવસ્તમાસતિ ।

તયા નો હિનુહી રથમ્ ॥ ૬.૦૪૫.૧૪

સ રથેન રથીતમોઽસ્માકેનાભિયુગ્વના ।
જેષિ જિષ્ણો હિતં ધનમ્ ॥ ૬.૦૪૫.૧૫

ય એક ઇત્તમુ ષ્ટુહિ કૃષ્ટીનાં વિચર્ષણિઃ ।
પતિર્જજ્ઞે વૃષક્રતુઃ ॥ ૬.૦૪૫.૧૬

યો ગૃણતામિદાસિથાપિરૂતી શિવઃ સખા ।
સ ત્વં ન ઇન્દ્ર મૃળય ॥ ૬.૦૪૫.૧૭

ધિષ્વ વજ્રં ગભસ્ત્યો રક્ષોહત્યાય વજ્રિવઃ ।
સાસહીષ્ઠા અભિ સ્પૃધઃ ॥ ૬.૦૪૫.૧૮

પ્રત્નં રયીણાં યુજં સખાયં કીરિચોદનમ્ ।
બ્રહ્મવાહસ્તમં હુવે ॥ ૬.૦૪૫.૧૯

સ હિ વિશ્વાનિ પાર્થિવાઁ એકો વસૂનિ પત્યતે ।
ગિર્વણસ્તમો અધ્રિગુઃ ॥ ૬.૦૪૫.૨૦

સ નો નિયુદ્ભિરા પૃણ કામં વાજેભિરશ્વિભિઃ ।
ગોમદ્ભિર્ગોપતે ધૃષત્ ॥ ૬.૦૪૫.૨૧

તદ્વો ગાય સુતે સચા પુરુહૂતાય સત્વને ।
શં યદ્ગવે ન શાકિને ॥ ૬.૦૪૫.૨૨

ન ઘા વસુર્નિ યમતે દાનં વાજસ્ય ગોમતઃ ।
યત્સીમુપ શ્રવદ્ગિરઃ ॥ ૬.૦૪૫.૨૩

કુવિત્સસ્ય પ્ર હિ વ્રજં ગોમન્તં દસ્યુહા ગમત્ ।
શચીભિરપ નો વરત્ ॥ ૬.૦૪૫.૨૪

ઇમા ઉ ત્વા શતક્રતોઽભિ પ્ર ણોનુવુર્ગિરઃ ।
ઇન્દ્ર વત્સં ન માતરઃ ॥ ૬.૦૪૫.૨૫

દૂણાશં સખ્યં તવ ગૌરસિ વીર ગવ્યતે ।
અશ્વો અશ્વાયતે ભવ ॥ ૬.૦૪૫.૨૬

સ મન્દસ્વા હ્યન્ધસો રાધસે તન્વા મહે ।
ન સ્તોતારં નિદે કરઃ ॥ ૬.૦૪૫.૨૭

ઇમા ઉ ત્વા સુતેસુતે નક્ષન્તે ગિર્વણો ગિરઃ ।

વત્સં ગાવો ન ધેનવઃ ॥ ૬.૦૪૫.૨૮

પુરૂતમં પુરૂણાં સ્તોતૄણાં વિવાચિ ।

વાજેભિર્વાજયતામ્ ॥ ૬.૦૪૫.૨૯

અસ્માકમિન્દ્ર ભૂતુ તે સ્તોમો વાહિષ્ઠો અન્તમઃ ।

અસ્માન્રાયે મહે હિનુ ॥ ૬.૦૪૫.૩૦

અધિ બૃબુઃ પણીનાં વર્ષિષ્ઠે મૂર્ધન્નસ્થાત્ ।

ઉરુઃ કક્ષો ન ગાઙ્ગ્યઃ ॥ ૬.૦૪૫.૩૧

યસ્ય વાયોરિવ દ્રવદ્ભદ્રા રાતિઃ સહસ્રિણી ।

સદ્યો દાનાય મંહતે ॥ ૬.૦૪૫.૩૨

તત્સુ નો વિશ્વે અર્ય આ સદા ગૃણન્તિ કારવઃ ।

બૃબું સહસ્રદાતમં સૂરિં સહસ્રસાતમમ્ ॥ ૬.૦૪૫.૩૩

ત્વામિદ્ધિ હવામહે સાતા વાજસ્ય કારવઃ ।

ત્વાં વૃત્રેષ્વિન્દ્ર સત્પતિં નરસ્ત્વાં કાષ્ઠાસ્વર્વતઃ ॥ ૬.૦૪૬.૦૧

સ ત્વં નશ્ચિત્ર વજ્રહસ્ત ધૃષ્ણુયા મહઃ સ્તવાનો અદ્રિવઃ ।

ગામશ્વં રથ્યમિન્દ્ર સં કિર સત્રા વાજં ન જિગ્યુષે ॥ ૬.૦૪૬.૦૨

યઃ સત્રાહા વિચર્ષણિરિન્દ્રં તં હૂમહે વયમ્ ।

સહસ્રમુષ્ક તુવિનૃમ્ણ સત્પતે ભવા સમત્સુ નો વૃધે ॥ ૬.૦૪૬.૦૩

બાધસે જનાન્વૃષભેવ મન્યુના ધૃષૌ મીળ્હ ઋચીષમ ।

અસ્માકં બોધ્યવિતા મહાધને તનૂષ્વપ્સુ સૂર્યે ॥ ૬.૦૪૬.૦૪

ઇન્દ્ર જ્યેષ્ઠં ન આ ભરઁ ઓજિષ્ઠં પપુરિ શ્રવઃ ।

યેનેમે ચિત્ર વજ્રહસ્ત રોદસી ઓભે સુશિપ્ર પ્રાઃ ॥ ૬.૦૪૬.૦૫

ત્વામુગ્રમવસે ચર્ષણીસહં રાજન્દેવેષુ હૂમહે ।

વિશ્વા સુ નો વિથુરા પિબ્દના વસોઽમિત્રાન્સુષહાન્કૃધિ ॥ ૬.૦૪૬.૦૬

યદિન્દ્ર નાહુષીષ્વાઁ ઓજો નૃમ્ણં ચ કૃષ્ટિષુ ।

યદ્વા પઞ્ચ ક્ષિતીનાં દ્યુમ્નમા ભર સત્રા વિશ્વાનિ પૌંસ્યા ॥ ૬.૦૪૬.૦૭

યદ્વા તૃક્ષૌ મઘવન્દ્રુહ્યાવા જને યત્પૂરૌ કચ્ચ વૃષ્ણ્યમ્ ।

અસ્મભ્યં તદ્રિરીહિ સં નૃષાહ્યેઽમિત્રાન્પૃત્સુ તુર્વણે ॥ ૬.૦૪૬.૦૮

ઇન્દ્ર ત્રિધાતુ શરણં ત્રિવરૂથં સ્વસ્તિમત્ ।
છર્દિર્યચ્છ મઘવદ્ભ્યશ્ચ મહ્યં ચ યાવયા દિદ્યુમેભ્યઃ ॥ ૬.૦૪૬.૦૯
યે ગવ્યતા મનસા શત્રુમાદભુરભિપ્રઘ્નન્તિ ધૃષ્ણુયા ।
અધ સ્મા નો મઘવન્નિન્દ્ર ગિર્વણસ્તનૂપા અન્તમો ભવ ॥ ૬.૦૪૬.૧૦
અધ સ્મા નો વૃધે ભવેન્દ્ર નાયમવા યુધિ ।
યદન્તરિક્ષે પતયન્તિ પર્ણિનો દિદ્યવસ્તિગ્મમૂર્ધાનઃ ॥ ૬.૦૪૬.૧૧
યત્ર શૂરાસસ્તન્વો વિતન્વતે પ્રિયા શર્મ પિતૄણામ્ ।
અધ સ્મા યચ્છ તન્વે૩ તને ચ છર્દિરચિત્તં યાવય દ્વેષઃ ॥ ૬.૦૪૬.૧૨
યદિન્દ્ર સર્ગે અર્વતશ્ચોદયાસે મહાધને ।
અસમને અધ્વનિ વૃજિને પથિ શ્યેનાઁ ઇવ શ્રવસ્યતઃ ॥ ૬.૦૪૬.૧૩
સિન્ધૂઁરિવ પ્રવણ આશુયા યતો યદિ ક્લોશમનુ ષ્વણિ ।
આ યે વયો ન વર્વૃતત્યામિષિ ગૃભીતા બાહ્વોર્ગવિ ॥ ૬.૦૪૬.૧૪

સ્વાદુષ્કિલાયં મધુમાઁ ઉતાયં તીવ્રઃ કિલાયં રસવાઁ ઉતાયમ્ ।
ઉતો ન્વ૧સ્ય પપિવાંસમિન્દ્રં ન કશ્ચન સહત આહવેષુ ॥ ૬.૦૪૭.૦૧
અયં સ્વાદુરિહ મદિષ્ઠ આસ યસ્યેન્દ્રો વૃત્રહત્યે મમાદ ।
પુરૂણિ યશ્ચ્યૌત્ના શમ્બરસ્ય વિ નવતિં નવ ચ દેહ્યો૩ હન્ ॥ ૬.૦૪૭.૦૨
અયં મે પીત ઉદિયર્તિ વાચમયં મનીષામુશતીમજીગઃ ।
અયં ષળુર્વીરમિમીત ધીરો ન યાભ્યો ભુવનં કચ્ચનારે ॥ ૬.૦૪૭.૦૩
અયં સ યો વરિમાણં પૃથિવ્યા વર્ષ્માણં દિવો અકૃણોદયં સઃ ।
અયં પીયૂષં તિસૃષુ પ્રવત્સુ સોમો દાધારોર્વ૧ન્તરિક્ષમ્ ॥ ૬.૦૪૭.૦૪
અયં વિદચ્ચિત્રદૃશીકમર્ણઃ શુક્રસદ્મનામુષસામનીકે ।
અયં મહાન્મહતા સ્કમ્ભનેનોદ્દ્યામસ્તભ્નાદ્વૃષભો મરુત્વાન્ ॥ ૬.૦૪૭.૦૫
ધૃષત્પિબ કલશે સોમમિન્દ્ર વૃત્રહા શૂર સમરે વસૂનામ્ ।
માધ્યંદિને સવન આ વૃષસ્વ રયિસ્થાનો રયિમસ્માસુ ધેહિ ॥ ૬.૦૪૭.૦૬
ઇન્દ્ર પ્ર ણઃ પુરએતેવ પશ્ય પ્ર નો નય પ્રતરં વસ્યો અચ્છ ।
ભવા સુપારો અતિપારયો નો ભવા સુનીતિરુત વામનીતિઃ ॥ ૬.૦૪૭.૦૭
ઉરું નો લોકમનુ નેષિ વિદ્વાન્સ્વર્વજ્જ્યોતિરભયં સ્વસ્તિ ।

ઋષ્વા ત ઇન્દ્ર સ્થવિરસ્ય બાહૂ ઉપ સ્થેયામ શરણા બૃહન્તા ॥ ૬.૦૪૭.૦૮
વરિષ્ઠે ન ઇન્દ્ર વન્ધુરે ધા વહિષ્ઠયોઃ શતાવન્નશ્વયોરા ।
ઇષમા વક્ષીષાં વર્ષિષ્ઠાં મા નસ્તારીન્મઘવન્રાયો અર્યઃ ॥ ૬.૦૪૭.૦૯
ઇન્દ્ર મૃળ મહ્યં જીવાતુમિચ્છ ચોદય ધિયમયસો ન ધારામ્ ।
યત્કિં ચાહં ત્વાયુરિદં વદામિ તજ્જુષસ્વ કૃધિ મા દેવવન્તમ્ ॥ ૬.૦૪૭.૧૦
ત્રાતારમિન્દ્રમવિતારમિન્દ્રં હવેહવે સુહવં શૂરમિન્દ્રમ્ ।
હ્વયામિ શક્રં પુરુહૂતમિન્દ્રં સ્વસ્તિ નો મઘવા ધાત્વિન્દ્રઃ ॥ ૬.૦૪૭.૧૧
ઇન્દ્રઃ સુત્રામા સ્વવાઁ અવોભિઃ સુમૃળીકો ભવતુ વિશ્વવેદાઃ ।
બાધતાં દ્વેષો અભયં કૃણોતુ સુવીર્યસ્ય પતયઃ સ્યામ ॥ ૬.૦૪૭.૧૨
તસ્ય વયં સુમતૌ યજ્ઞિયસ્યાપિ ભદ્રે સૌમનસે સ્યામ ।
સ સુત્રામા સ્વવાઁ ઇન્દ્રો અસ્મે આરાચ્ચિદ્દ્વેષઃ સનુતર્યુયોતુ ॥ ૬.૦૪૭.૧૩
અવ ત્વે ઇન્દ્ર પ્રવતો નોર્મિર્ગિરો બ્રહ્માણિ નિયુતો ધવન્તે ।
ઉરૂ ન રાધઃ સવના પુરૂણ્યપો ગા વજ્રિન્યુવસે સમિન્દૂન્ ॥ ૬.૦૪૭.૧૪
ક ઈં સ્તવત્કઃ પૃણાત્કો યજાતે યદુગ્રમિન્મઘવા વિશ્વહાવેત્ ।
પાદાવિવ પ્રહરન્નન્યમન્યં કૃણોતિ પૂર્વમપરં શચીભિઃ ॥ ૬.૦૪૭.૧૫
શૃણ્વે વીર ઉગ્રમુગ્રં દમાયન્નન્યમન્યમતિનેનીયમાનઃ ।
એધમાનદ્વિળુભયસ્ય રાજા ચોષ્કૂયતે વિશ ઇન્દ્રો મનુષ્યાન્ ॥ ૬.૦૪૭.૧૬
પરા પૂર્વેષાં સખ્યા વૃણક્તિ વિતર્તુરાણો અપરેભિરેતિ ।
અનાનુભૂતીરવધૂન્વાનઃ પૂર્વીરિન્દ્રઃ શરદસ્તર્તરીતિ ॥ ૬.૦૪૭.૧૭
રૂપંરૂપં પ્રતિરૂપો બભૂવ તદસ્ય રૂપં પ્રતિચક્ષણાય ।
ઇન્દ્રો માયાભિઃ પુરુરૂપ ઈયતે યુક્તા હ્યસ્ય હરયઃ શતા દશ ॥ ૬.૦૪૭.૧૮
યુજાનો હરિતા રથે ભૂરિ ત્વષ્ટેહ રાજતિ ।
કો વિશ્વાહા દ્વિષતઃ પક્ષ આસત ઉતાસીનેષુ સૂરિષુ ॥ ૬.૦૪૭.૧૯
અગવ્યૂતિ ક્ષેત્રમાગન્મ દેવા ઉર્વી સતી ભૂમિરંહૂરણાભૂત્ ।
બૃહસ્પતે પ્ર ચિકિત્સા ગવિષ્ટાવિત્થા સતે જરિત્ર ઇન્દ્ર પન્થામ્ ॥ ૬.૦૪૭.૨૦
દિવેદિવે સદૃશીરન્યમર્ધં કૃષ્ણા અસેધદપ સદ્મનો જાઃ ।
અહન્દાસા વૃષભો વસ્નયન્તોદવ્રજે વર્ચિનં શમ્બરં ચ ॥ ૬.૦૪૭.૨૧

પ્રસ્તોક ઇન્નુ રાધસસ્ત ઇન્દ્ર દશ કોશયીર્દશ વાજિનોઽદાત્ ।
દિવોદાસાદતિથિગ્વસ્ય રાધઃ શામ્બરં વસુ પ્રત્યગ્રભીષ્મ ॥ ૬.૦૪૭.૨૨
દશાશ્વાન્દશ કોશાન્દશ વસ્ત્રાધિભોજના ।
દશો હિરણ્યપિણ્ડાન્દિવોદાસાદસાનિષમ્ ॥ ૬.૦૪૭.૨૩
દશ રથાન્પ્રષ્ટિમતઃ શતં ગા અથર્વભ્યઃ ।
અશ્વથઃ પાયવેઽદાત્ ॥ ૬.૦૪૭.૨૪
મહિ રાધો વિશ્વજન્યં દધાનાન્ભરદ્વાજાન્સાર્ઞ્જયો અભ્યયષ્ટ ॥ ૬.૦૪૭.૨૫
વનસ્પતે વીડ્વઙ્ગો હિ ભૂયા અસ્મત્સખા પ્રતરણઃ સુવીરઃ ।
ગોભિઃ સંનદ્ધો અસિ વીળયસ્વાસ્થાતા તે જયતુ જેત્વાનિ ॥ ૬.૦૪૭.૨૬
દિવસ્પૃથિવ્યાઃ પર્યોજ ઉદ્ભૃતં વનસ્પતિભ્યઃ પર્યાભૃતં સહઃ ।
અપામોજ્માનં પરિ ગોભિરાવૃતમિન્દ્રસ્ય વજ્રં હવિષા રથં યજ ॥ ૬.૦૪૭.૨૭
ઇન્દ્રસ્ય વજ્રો મરુતામનીકં મિત્રસ્ય ગર્ભો વરુણસ્ય નાભિઃ ।
સેમાં નો હવ્યદાતિં જુષાણો દેવ રથ પ્રતિ હવ્યા ગૃભાય ॥ ૬.૦૪૭.૨૮
ઉપ શ્વાસય પૃથિવીમુત દ્યાં પુરુત્રા તે મનુતાં વિષ્ઠિતં જગત્ ।
સ દુન્દુભે સજૂરિન્દ્રેણ દેવૈર્દૂરાદ્દવીયો અપ સેધ શત્રૂન્ ॥ ૬.૦૪૭.૨૯
આ ક્રન્દય બલમોજો ન આ ધા નિઃ ષ્ટનિહિ દુરિતા બાધમાનઃ ।
અપ પ્રોથ દુન્દુભે દુચ્છુના ઇત ઇન્દ્રસ્ય મુષ્ટિરસિ વીળયસ્વ ॥ ૬.૦૪૭.૩૦
આમૂરજ પ્રત્યાવર્તયેમાઃ કેતુમદ્દુન્દુભિર્વાવદીતિ ।
સમશ્વપર્ણાશ્ચરન્તિ નો નરોઽસ્માકમિન્દ્ર રથિનો જયન્તુ ॥ ૬.૦૪૭.૩૧
યજ્ઞાયજ્ઞા વો અગ્નયે ગિરાગિરા ચ દક્ષસે ।
પ્રપ્ર વયમમૃતં જાતવેદસં પ્રિયં મિત્રં ન શંસિષમ્ ॥ ૬.૦૪૮.૦૧
ઊર્જો નપાતં સ હિનાયમસ્મયુર્દાશેમ હવ્યદાતયે ।
ભુવદ્વાજેષ્વવિતા ભુવદ્વૃધ ઉત ત્રાતા તનૂનામ્ ॥ ૬.૦૪૮.૦૨
વૃષા હ્યગ્ને અજરો મહાન્વિભાસ્યર્ચિષા ।
અજસ્રેણ શોચિષા શોશુચચ્છુચે સુદીતિભિઃ સુ દીદિહિ ॥ ૬.૦૪૮.૦૩
મહો દેવાન્યજસિ યક્ષ્યાનુષક્તવ ક્રત્વોત દંસના ।
અર્વાચઃ સીં કૃણુહ્યગ્નેઽવસે રાસ્વ વાજોત વંસ્વ ॥ ૬.૦૪૮.૦૪

યમાપો અદ્રયો વના ગર્ભમૃતસ્ય પિપ્રતિ ।
સહસા યો મથિતો જાયતે નૃભિઃ પૃથિવ્યા અધિ સાનવિ ॥ ૬.૦૪૮.૦૫
આ યઃ પપ્રૌ ભાનુના રોદસી ઉભે ધૂમેન ધાવતે દિવિ ।
તિરસ્તમો દદૃશ ઊર્મ્યાસ્વા શ્યાવાસ્વરુષો વૃષા શ્યાવા અરુષો વૃષા ॥ ૬.૦૪૮.૦૬
બૃહદ્ભિરગ્ને અર્ચિભિઃ શુક્રેણ દેવ શોચિષા ।
ભરદ્વાજે સમિધાનો યવિષ્ઠ્ય રેવન્નઃ શુક્ર દીદિહિ દ્યુમત્પાવક દીદિહિ ॥ ૬.૦૪૮.૦૭
વિશ્વાસાં ગૃહપતિર્વિશામસિ ત્વમગ્ને માનુષીણામ્ ।
શતં પૂર્ભિર્યવિષ્ઠ પાહ્યંહસઃ સમેદ્ધારં શતં હિમાઃ સ્તોતૃભ્યો યે ચ દદતિ ॥ ૬.૦૪૮.૦૮
ત્વં નશ્ચિત્ર ઊત્યા વસો રાધાંસિ ચોદય ।
અસ્ય રાયસ્ત્વમગ્ને રથીરસિ વિદા ગાધં તુચે તુ નઃ ॥ ૬.૦૪૮.૦૯
પર્ષિ તોકં તનયં પર્તૃભિષ્ટ્વમદબ્ધૈરપ્રયુત્વભિઃ ।
અગ્ને હેળાંસિ દૈવ્યા યુયોધિ નોઽદેવાનિ હ્વરાંસિ ચ ॥ ૬.૦૪૮.૧૦
આ સખાયઃ સબર્દુઘાં ધેનુમજધ્વમુપ નવ્યસા વચઃ ।
સૃજધ્વમનપસ્ફુરામ્ ॥ ૬.૦૪૮.૧૧
યા શર્ધાય મારુતાય સ્વભાનવે શ્રવોઽમૃત્યુ ધુક્ષત ।
યા મૃળીકે મરુતાં તુરાણાં યા સુમ્નૈરેવયાવરી ॥ ૬.૦૪૮.૧૨
ભરદ્વાજાયાવ ધુક્ષત દ્વિતા ।
ધેનું ચ વિશ્વદોહસમિષં ચ વિશ્વભોજસમ્ ॥ ૬.૦૪૮.૧૩
તં વ ઇન્દ્રં ન સુક્રતું વરુણમિવ માયિનમ્ ।
અર્યમણં ન મન્દ્રં સૃપ્રભોજસં વિષ્ણું ન સ્તુષ આદિશે ॥ ૬.૦૪૮.૧૪
ત્વેષં શર્ધો ન મારુતં તુવિષ્વણ્યનર્વાણં પૂષણં સં યથા શતા ।
સં સહસ્રા કારિષચ્ચર્ષણિભ્ય આઁ આવિર્ગૂળ્હા વસૂ કરત્સુવેદા નો વસૂ કરત્ ॥ ૬.૦૪૮.૧૫
આ મા પૂષન્નુપ દ્રવ શંસિષં નુ તે અપિકર્ણ આઘૃણે ।
અઘા અર્યો અરાતયઃ ॥ ૬.૦૪૮.૧૬
મા કાકમ્બીરમુદ્વૃહો વનસ્પતિમશસ્તીર્વિ હિ નીનશઃ ।
મોત સૂરો અહ એવા ચન ગ્રીવા આદધતે વેઃ ॥ ૬.૦૪૮.૧૭
દૃતેરિવ તેઽવૃકમસ્તુ સખ્યમ્ ।

અચ્છિદ્રસ્ય દધન્વતઃ સુપૂર્ણસ્ય દધન્વતઃ ॥ ૬.૦૪૮.૧૮

પરો હિ મર્ત્યૈરસિ સમો દેવૈરુત શ્રિયા ।

અભિ ખ્યઃ પૂષન્પૃતનાસુ નસ્ત્વમવા નૂનં યથા પુરા ॥ ૬.૦૪૮.૧૯

વામી વામસ્ય ધૂતયઃ પ્રણીતિરસ્તુ સૂનૃતા ।

દેવસ્ય વા મરુતો મર્ત્યસ્ય વેજાનસ્ય પ્રયજ્યવઃ ॥ ૬.૦૪૮.૨૦

સદ્યશ્ચિદ્યસ્ય ચર્કૃતિઃ પરિ દ્યાં દેવો નૈતિ સૂર્યઃ ।

ત્વેષં શવો દધિરે નામ યજ્ઞિયં મરુતો વૃત્રહં શવો જ્યેષ્ઠં વૃત્રહં શવઃ ॥ ૬.૦૪૮.૨૧

સકૃદ્ધ દ્યૌરજાયત સકૃદ્ભૂમિરજાયત ।

પૃશ્ન્યા દુગ્ધં સકૃત્પયસ્તદન્યો નાનુ જાયતે ॥ ૬.૦૪૮.૨૨

સ્તુષે જનં સુવ્રતં નવ્યસીભિર્ગીર્ભિર્મિત્રાવરુણા સુમ્નયન્તા ।

ત આ ગમન્તુ ત ઇહ શ્રુવન્તુ સુક્ષત્રાસો વરુણો મિત્રો અગ્નિઃ ॥ ૬.૦૪૯.૦૧

વિશોવિશ ઈડ્યમધ્વરેષ્વદૃપ્તક્રતુમરતિં યુવત્યોઃ ।

દિવઃ શિશું સહસઃ સૂનુમગ્નિં યજ્ઞસ્ય કેતુમરુષં યજધ્યૈ ॥ ૬.૦૪૯.૦૨

અરુષસ્ય દુહિતરા વિરૂપે સ્તૃભિરન્યા પિપિશે સૂરો અન્યા ।

મિથસ્તુરા વિચરન્તી પાવકે મન્મ શ્રુતં નક્ષત ઋચ્યમાને ॥ ૬.૦૪૯.૦૩

પ્ર વાયુમચ્છા બૃહતી મનીષા બૃહદ્રયિં વિશ્વવારં રથપ્રામ્ ।

દ્યુતદ્યામા નિયુતઃ પત્યમાનઃ કવિઃ કવિમિયક્ષસિ પ્રયજ્યો ॥ ૬.૦૪૯.૦૪

સ મે વપુશ્છદયદશ્વિનોર્યો રથો વિરુક્માન્મનસા યુજાનઃ ।

યેન નરા નાસત્યેષયધ્યૈ વર્તિર્યાથસ્તનયાય ત્મને ચ ॥ ૬.૦૪૯.૦૫

પર્જન્યવાતા વૃષભા પૃથિવ્યાઃ પુરીષાણિ જિન્વતમપ્યાનિ ।

સત્યશ્રુતઃ કવયો યસ્ય ગીર્ભિર્જગતઃ સ્થાતર્જગદા કૃણુધ્વમ્ ॥ ૬.૦૪૯.૦૬

પાવીરવી કન્યા ચિત્રાયુઃ સરસ્વતી વીરપત્ની ધિયં ધાત્ ।

ગ્નાભિરચ્છિદ્રં શરણં સજોષા દુરાધર્ષં ગૃણતે શર્મ યંસત્ ॥ ૬.૦૪૯.૦૭

પથસ્પથઃ પરિપતિં વચસ્યા કામેન કૃતો અભ્યાનળર્કમ્ ।

સ નો રાસચ્છુરુધશ્ચન્દ્રાગ્રા ધિયંધિયં સીષધાતિ પ્ર પૂષા ॥ ૬.૦૪૯.૦૮

પ્રથમભાજં યશસં વયોધાં સુપાણિં દેવં સુગભસ્તિમૃભ્વમ્ ।

હોતા યક્ષદ્યજતં પસ્ત્યાનામગ્નિસ્ત્વષ્ટારં સુહવં વિભાવા ॥ ૬.૦૪૯.૦૯

ભુવનસ્ય પિતરં ગીર્ભિરાભી રુદ્રં દિવા વર્ધયા રુદ્રમક્તૌ ।

બૃહન્તમૃષ્વમજરં સુષુમ્નમૃધગ્ઘુવેમ કવિનેષિતાસઃ ॥ ૬.૦૪૯.૧૦

આ યુવાનઃ કવયો યજ્ઞિયાસો મરુતો ગન્ત ગૃણતો વરસ્યામ્ ।

અચિત્રં ચિદ્ધિ જિન્વથા વૃધન્ત ઇત્થા નક્ષન્તો નરો અઙ્ગિરસ્વત્ ॥ ૬.૦૪૯.૧૧

પ્ર વીરાય પ્ર તવસે તુરાયાજા યૂથેવ પશુરક્ષિરસ્તમ્ ।

સ પિસ્પૃશતિ તન્વિ શ્રુતસ્ય સ્તૃભિર્ન નાકં વચનસ્ય વિપઃ ॥ ૬.૦૪૯.૧૨

યો રજાંસિ વિમમે પાર્થિવાનિ ત્રિશ્ચિદ્વિષ્ણુર્મનવે બાધિતાય ।

તસ્ય તે શર્મન્નુપદદ્યમાને રાયા મદેમ તન્વા૩ તના ચ ॥ ૬.૦૪૯.૧૩

તન્નોઽહિર્બુધ્ન્યો અદ્ભિરર્કૈસ્તત્પર્વતસ્તત્સવિતા ચનો ધાત્ ।

તદોષધીભિરભિ રાતિષાચો ભગઃ પુરંધિર્જિન્વતુ પ્ર રાયે ॥ ૬.૦૪૯.૧૪

નુ નો રયિં રથ્યં ચર્ષણિપ્રાં પુરુવીરં મહ ઋતસ્ય ગોપામ્ ।

ક્ષયં દાતાજરં યેન જનાન્સ્પૃધો અદેવીરભિ ચ ક્રમામ વિશ આદેવીરભ્ય૧શ્નવામ ॥ ૬.૦૪૯.૧૫

હુવે વો દેવીમદિતિં નમોભિર્મૃળીકાય વરુણં મિત્રમગ્નિમ્ ।

અભિક્ષદામર્યમણં સુશેવં ત્રાતૄન્દેવાન્સવિતારં ભગં ચ ॥ ૬.૦૫૦.૦૧

સુજ્યોતિષઃ સૂર્ય દક્ષપિતૄનનાગાસ્ત્વે સુમહો વીહિ દેવાન્ ।

દ્વિજન્માનો ય ઋતસાપઃ સત્યાઃ સ્વર્વન્તો યજતા અગ્નિજિહ્વાઃ ॥ ૬.૦૫૦.૦૨

ઉત દ્યાવાપૃથિવી ક્ષત્રમુરુ બૃહદ્રોદસી શરણં સુષુમ્ને ।

મહસ્કરથો વરિવો યથા નોઽસ્મે ક્ષયાય ધિષણે અનેહઃ ॥ ૬.૦૫૦.૦૩

આ નો રુદ્રસ્ય સૂનવો નમન્તામદ્યા હૂતાસો વસવોઽધૃષ્ટાઃ ।

યદીમર્ભે મહતિ વા હિતાસો બાધે મરુતો અહ્વામ દેવાન્ ॥ ૬.૦૫૦.૦૪

મિમ્યક્ષ યેષુ રોદસી નુ દેવી સિષક્તિ પૂષા અભ્યર્ધયજ્વા ।

શ્રુત્વા હવં મરુતો યદ્ધ યાથ ભૂમા રેજન્તે અધ્વનિ પ્રવિક્તે ॥ ૬.૦૫૦.૦૫

અભિ ત્યં વીરં ગિર્વણસમર્ચેન્દ્રં બ્રહ્મણા જરિતર્નવેન ।

શ્રવદિદ્ધવમુપ ચ સ્તવાનો રાસદ્વાજાઁ ઉપ મહો ગૃણાનઃ ॥ ૬.૦૫૦.૦૬

ઓમાનમાપો માનુષીરમૃક્તં ધાત તોકાય તનયાય શં યોઃ ।

યૂયં હિ ષ્ઠા ભિષજો માતૃતમા વિશ્વસ્ય સ્થાતુર્જગતો જનિત્રીઃ ॥ ૬.૦૫૦.૦૭

આ નો દેવઃ સવિતા ત્રાયમાણો હિરણ્યપાણિર્યજતો જગમ્યાત્ ।

યો દત્રવાઁ ઉષસો ન પ્રતીકં વ્યૂર્ણુતે દાશુષે વાર્યાણિ ॥ ૬.૦૫૦.૦૮
ઉત ત્વં સૂનો સહસો નો અદ્યા દેવાઁ અસ્મિન્નધ્વરે વવૃત્યાઃ ।
સ્યામહં તે સદમિદ્રાતૌ તવ સ્યામગ્નેઽવસા સુવીરઃ ॥ ૬.૦૫૦.૦૯
ઉત ત્યા મે હવમા જગ્મ્યાતં નાસત્યા ધીભિર્યુવમઙ્ગ વિપ્રા ।
અત્રિં ન મહસ્તમસોઽમુમુક્તં તૂર્વતં નરા દુરિતાદભીકે ॥ ૬.૦૫૦.૧૦
તે નો રાયો દ્યુમતો વાજવતો દાતારો ભૂત નૃવતઃ પુરુક્ષોઃ ।
દશસ્યન્તો દિવ્યાઃ પાર્થિવાસો ગોજાતા અપ્યા મૃળતા ચ દેવાઃ ॥ ૬.૦૫૦.૧૧
તે નો રુદ્રઃ સરસ્વતી સજોષા મીળ્હુષ્મન્તો વિષ્ણુર્મૃળન્તુ વાયુઃ ।
ઋભુક્ષા વાજો દૈવ્યો વિધાતા પર્જન્યાવાતા પિપ્યતામિષં નઃ ॥ ૬.૦૫૦.૧૨
ઉત સ્ય દેવઃ સવિતા ભગો નોઽપાં નપાદવતુ દાનુ પપ્રિઃ ।
ત્વષ્ટા દેવેભિર્જનિભિઃ સજોષા દ્યૌર્દેવેભિઃ પૃથિવી સમુદ્રૈઃ ॥ ૬.૦૫૦.૧૩
ઉત નોઽહિર્બુધ્ન્યઃ શૃણોત્વજ એકપાત્પૃથિવી સમુદ્રઃ ।
વિશ્વે દેવા ઋતાવૃધો હુવાનાઃ સ્તુતા મન્ત્રાઃ કવિશસ્તા અવન્તુ ॥ ૬.૦૫૦.૧૪
એવા નપાતો મમ તસ્ય ધીભિર્ભરદ્વાજા અભ્યર્ચન્ત્યર્કૈઃ ।
ગ્ના હુતાસો વસવોઽધૃષ્ટા વિશ્વે સ્તુતાસો ભૂતા યજત્રાઃ ॥ ૬.૦૫૦.૧૫

ઉદુ ત્યચ્ચક્ષુર્મહિ મિત્રયોરાઁ એતિ પ્રિયં વરુણયોરદબ્ધમ્ ।
ઋતસ્ય શુચિ દર્શતમનીકં રુક્મો ન દિવ ઉદિતા વ્યદ્યૌત્ ॥ ૬.૦૫૧.૦૧
વેદ યસ્ત્રીણિ વિદથાન્યેષાં દેવાનાં જન્મ સનુતરા ચ વિપ્રઃ ।
ઋજુ મર્તેષુ વૃજિના ચ પશ્યન્નભિ ચષ્ટે સૂરો અર્ય એવાન્ ॥ ૬.૦૫૧.૦૨
સ્તુષ ઉ વો મહ ઋતસ્ય ગોપાનદિતિં મિત્રં વરુણં સુજાતાન્ ।
અર્યમણં ભગમદબ્ધધીતીનચ્છા વોચે સધન્યઃ પાવકાન્ ॥ ૬.૦૫૧.૦૩
રિશાદસઃ સત્પતીઁરદબ્ધાન્મહો રાજ્ઞઃ સુવસનસ્ય દાતૄન્ ।
યૂનઃ સુક્ષત્રાન્ક્ષયતો દિવો નૄનાદિત્યાન્યામ્યદિતિં દુવોયુ ॥ ૬.૦૫૧.૦૪
દ્યૌ૩ષ્પિતઃ પૃથિવિ માતરધ્રુગગ્ને ભ્રાતર્વસવો મૃળતા નઃ ।
વિશ્વ આદિત્યા અદિતે સજોષા અસ્મભ્યં શર્મ બહુલં વિ યન્ત ॥ ૬.૦૫૧.૦૫
મા નો વૃકાય વૃક્યે સમસ્મા અઘાયતે રીરધતા યજત્રાઃ ।
યૂયં હિ ષ્ઠા રથ્યો નસ્તનૂનાં યૂયં દક્ષસ્ય વચસો બભૂવ ॥ ૬.૦૫૧.૦૬

મા વ એનો અન્યકૃતં ભુજેમ મા તત્કર્મ વસવો યચ્ચયધ્વે ।
વિશ્વસ્ય હિ ક્ષયથ વિશ્વદેવાઃ સ્વયં રિપુસ્તન્વં રીરિષીષ્ટ ॥ ૬.૦૫૧.૦૭

નમ ઇદુગ્રં નમ આ વિવાસે નમો દાધાર પૃથિવીમુત દ્યામ્ ।
નમો દેવેભ્યો નમ ઈશ એષાં કૃતં ચિદેનો નમસા વિવાસે ॥ ૬.૦૫૧.૦૮

ઋતસ્ય વો રથ્યઃ પૂતદક્ષાનૃતસ્ય પસ્ત્યસદો અદબ્ધાન્ ।
તાઁ આ નમોભિરુરુચક્ષસો નૄન્વિશ્વાન્વ આ નમે મહો યજત્રાઃ ॥ ૬.૦૫૧.૦૯

તે હિ શ્રેષ્ઠવર્ચસસ્ત ઉ નસ્તિરો વિશ્વાનિ દુરિતા નયન્તિ ।
સુક્ષત્રાસો વરુણો મિત્રો અગ્નિરૃતધીતયો વક્મરાજસત્યાઃ ॥ ૬.૦૫૧.૧૦

તે ન ઇન્દ્રઃ પૃથિવી ક્ષામ વર્ધન્પૂષા ભગો અદિતિઃ પઞ્ચ જનાઃ ।
સુશર્માણઃ સ્વવસઃ સુનીથા ભવન્તુ નઃ સુત્રાત્રાસઃ સુગોપાઃ ॥ ૬.૦૫૧.૧૧

નૂ સદ્માનં દિવ્યં નંશિ દેવા ભારદ્વાજઃ સુમતિં યાતિ હોતા ।
આસાનેભિર્યજમાનો મિયેધૈર્દેવાનાં જન્મ વસૂયુર્વવન્દ ॥ ૬.૦૫૧.૧૨

અપ ત્યં વૃજિનં રિપું સ્તેનમગ્ને દુરાધ્યમ્ ।
દવિષ્ઠમસ્ય સત્પતે કૃધી સુગમ્ ॥ ૬.૦૫૧.૧૩

ગ્રાવાણઃ સોમ નો હિ કં સખિત્વનાય વાવશુઃ ।
જહી ન્યત્રિણં પણિં વૃકો હિ ષઃ ॥ ૬.૦૫૧.૧૪

યૂયં હિ ષ્ઠા સુદાનવ ઇન્દ્રજ્યેષ્ઠા અભિદ્યવઃ ।
કર્તા નો અધ્વન્ના સુગં ગોપા અમા ॥ ૬.૦૫૧.૧૫

અપિ પન્થામગન્મહિ સ્વસ્તિગામનેહસમ્ ।
યેન વિશ્વાઃ પરિ દ્વિષો વૃણક્તિ વિન્દતે વસુ ॥ ૬.૦૫૧.૧૬

ન તદ્દિવા ન પૃથિવ્યાનુ મન્યે ન યજ્ઞેન નોત શમીભિરાભિઃ ।
ઉબ્જન્તુ તં સુભ્વ૧ઃ પર્વતાસો નિ હીયતામતિયાજસ્ય યષ્ટા ॥ ૬.૦૫૨.૦૧

અતિ વા યો મરુતો મન્યતે નો બ્રહ્મ વા યઃ ક્રિયમાણં નિનિત્સાત્ ।
તપૂંષિ તસ્મૈ વૃજિનાનિ સન્તુ બ્રહ્મદ્વિષમભિ તં શોચતુ દ્યૌઃ ॥ ૬.૦૫૨.૦૨

કિમઙ્ગ ત્વા બ્રહ્મણઃ સોમ ગોપાં કિમઙ્ગ ત્વાહુરભિશસ્તિપાં નઃ ।
કિમઙ્ગ નઃ પશ્યસિ નિદ્યમાનાન્બ્રહ્મદ્વિષે તપુષિં હેતિમસ્ય ॥ ૬.૦૫૨.૦૩

અવન્તુ મામુષસો જાયમાના અવન્તુ મા સિન્ધવઃ પિન્વમાનાઃ ।

અવન્તુ મા પર્વતાસો ધ્રુવાસોઽવન્તુ મા પિતરો દેવહૂતૌ ॥ ૬.૦૫૨.૦૪
વિશ્વદાનીં સુમનસઃ સ્યામ પશ્યેમ નુ સૂર્યમુચ્ચરન્તમ્ ।
તથા કરદ્વસુપતિર્વસૂનાં દેવાઁ ઓહાનોઽવસાગમિષ્ઠઃ ॥ ૬.૦૫૨.૦૫
ઇન્દ્રો નેદિષ્ઠમવસાગમિષ્ઠઃ સરસ્વતી સિન્ધુભિઃ પિન્વમાના ।
પર્જન્યો ન ઓષધીભિર્મયોભુરગ્નિઃ સુશંસઃ સુહવઃ પિતેવ ॥ ૬.૦૫૨.૦૬
વિશ્વે દેવાસ આ ગત શ‍ૃણુતા મ ઇમં હવમ્ ।
એદં બર્હિર્નિ ષીદત ॥ ૬.૦૫૨.૦૭
યો વો દેવા ઘૃતસ્નુના હવ્યેન પ્રતિભૂષતિ ।
તં વિશ્વ ઉપ ગચ્છથ ॥ ૬.૦૫૨.૦૮
ઉપ નઃ સૂનવો ગિરઃ શ‍ૃણ્વન્ત્વમૃતસ્ય યે ।
સુમૃળીકા ભવન્તુ નઃ ॥ ૬.૦૫૨.૦૯
વિશ્વે દેવા ઋતાવૃધ ઋતુભિર્હવનશ્રુતઃ ।
જુષન્તાં યુજ્યં પયઃ ॥ ૬.૦૫૨.૧૦
સ્તોત્રમિન્દ્રો મરુદ્ગણસ્ત્વષ્ટૃમાન્મિત્રો અર્યમા ।
ઇમા હવ્યા જુષન્ત નઃ ॥ ૬.૦૫૨.૧૧
ઇમં નો અગ્ને અધ્વરં હોતર્વયુનશો યજ ।
ચિકિત્વાન્દૈવ્યં જનમ્ ॥ ૬.૦૫૨.૧૨
વિશ્વે દેવાઃ શ‍ૃણુતેમં હવં મે યે અન્તરિક્ષે ય ઉપ દ્યવિ ષ્ઠ ।
યે અગ્નિજિહ્વા ઉત વા યજત્રા આસદ્યાસ્મિન્બર્હિષિ માદયધ્વમ્ ॥ ૬.૦૫૨.૧૩
વિશ્વે દેવા મમ શ‍ૃણ્વન્તુ યજ્ઞિયા ઉભે રોદસી અપાં નપાચ્ચ મન્મ ।
મા વો વચાંસિ પરિચક્ષ્યાણિ વોચં સુમ્નેષ્વિદ્વો અન્તમા મદેમ ॥ ૬.૦૫૨.૧૪
યે કે ચ જ્મા મહિનો અહિમાયા દિવો જજ્ઞિરે અપાં સધસ્થે ।
તે અસ્મભ્યમિષયે વિશ્વમાયુઃ ક્ષપ ઉસ્રા વરિવસ્યન્તુ દેવાઃ ॥ ૬.૦૫૨.૧૫
અગ્નીપર્જન્યાવવતં ધિયં મેઽસ્મિન્હવે સુહવા સુષ્ટુતિં નઃ ।
ઇળામન્યો જનયદ્ગર્ભમન્યઃ પ્રજાવતીરિષ આ ધત્તમસ્મે ॥ ૬.૦૫૨.૧૬
સ્તીર્ણે બર્હિષિ સમિધાને અગ્નૌ સૂક્તેન મહા નમસા વિવાસે ।
અસ્મિન્નો અદ્ય વિદથે યજત્રા વિશ્વે દેવા હવિષિ માદયધ્વમ્ ॥ ૬.૦૫૨.૧૭

વયમુ ત્વા પથસ્પતે રથં ન વાજસાતયે ।
ધિયે પૂષન્નયુજ્મહિ ॥ ૬.૦૫૩.૦૧
અભિ નો નર્યં વસુ વીરં પ્રયતદક્ષિણમ્ ।
વામં ગૃહપતિં નય ॥ ૬.૦૫૩.૦૨
અદિત્સન્તં ચિદાઘૃણે પૂષન્દાનાય ચોદય ।
પણેશ્ચિદ્વિ મ્રદા મનઃ ॥ ૬.૦૫૩.૦૩
વિ પથો વાજસાતયે ચિનુહિ વિ મૃધો જહિ ।
સાધન્તામુગ્ર નો ધિયઃ ॥ ૬.૦૫૩.૦૪
પરિ તૃન્ધિ પણીનામારયા હૃદયા કવે ।
અથેમસ્મભ્યં રન્ધય ॥ ૬.૦૫૩.૦૫
વિ પૂષન્નારયા તુદ પણેરિચ્છ હૃદિ પ્રિયમ્ ।
અથેમસ્મભ્યં રન્ધય ॥ ૬.૦૫૩.૦૬
આ રિખ કિકિરા કૃણુ પણીનાં હૃદયા કવે ।
અથેમસ્મભ્યં રન્ધય ॥ ૬.૦૫૩.૦૭
યાં પૂષન્બ્રહ્મચોદનીમારાં બિભર્ષ્યાઘૃણે ।
તયા સમસ્ય હૃદયમા રિખ કિકિરા કૃણુ ॥ ૬.૦૫૩.૦૮
યા તે અષ્ટ્રા ગોપશાઘૃણે પશુસાધની ।
તસ્યાસ્તે સુમ્નમીમહે ॥ ૬.૦૫૩.૦૯
ઉત નો ગોષણિં ધિયમશ્વસાં વાજસામુત ।
નૃવત્કૃણુહિ વીતયે ॥ ૬.૦૫૩.૧૦
સં પૂષન્વિદુષા નય યો અઞ્જસાનુશાસતિ ।
ય એવેદમિતિ બ્રવત્ ॥ ૬.૦૫૪.૦૧
સમુ પૂષ્ણા ગમેમહિ યો ગૃહાઁ અભિશાસતિ ।
ઇમ એવેતિ ચ બ્રવત્ ॥ ૬.૦૫૪.૦૨
પૂષ્ણશ્ચક્રં ન રિષ્યતિ ન કોશોઽવ પદ્યતે ।
નો અસ્ય વ્યથતે પવિઃ ॥ ૬.૦૫૪.૦૩
યો અસ્મૈ હવિષાવિધન્ન તં પૂષાપિ મૃષ્યતે ।

પ્રથમો વિન્દતે વસુ ॥ ૬.૦૫૪.૦૪
પૂષા ગા અન્વેતુ નઃ પૂષા રક્ષત્વર્વતઃ ।
પૂષા વાજં સનોતુ નઃ ॥ ૬.૦૫૪.૦૫
પૂષન્નનુ પ્ર ગા ઇહિ યજમાનસ્ય સુન્વતઃ ।
અસ્માકં સ્તુવતામુત ॥ ૬.૦૫૪.૦૬
માકિર્નેશન્માકીં રિષન્માકીં સં શારિ કેવટે ।
અથારિષ્ટાભિરા ગહિ ॥ ૬.૦૫૪.૦૭
શ઼ૃણ્વન્તં પૂષણં વયમિર્યમનષ્ટવેદસમ્ ।
ઈશાનં રાય ઈમહે ॥ ૬.૦૫૪.૦૮
પૂષન્તવ વ્રતે વયં ન રિષ્યેમ કદા ચન ।
સ્તોતારસ્ત ઇહ સ્મસિ ॥ ૬.૦૫૪.૦૯
પરિ પૂષા પરસ્તાદ્ધસ્તં દધાતુ દક્ષિણમ્ ।
પુનર્નો નષ્ટમાજતુ ॥ ૬.૦૫૪.૧૦
એહિ વાં વિમુચો નપાદાઘૃણે સં સચાવહૈ ।
રથીરૃતસ્ય નો ભવ ॥ ૬.૦૫૫.૦૧
રથીતમં કપર્દિનમીશાનં રાધસો મહઃ ।
રાયઃ સખાયમીમહે ॥ ૬.૦૫૫.૦૨
રાયો ધારાસ્યાઘૃણે વસો રાશિરજાશ્વ ।
ધીવતોધીવતઃ સખા ॥ ૬.૦૫૫.૦૩
પૂષણં ન્વ૧જાશ્વમુપ સ્તોષામ વાજિનમ્ ।
સ્વસુર્યો જાર ઉચ્યતે ॥ ૬.૦૫૫.૦૪
માતુર્દિધિષુમબ્રવં સ્વસુર્જારઃ શ઼ૃણોતુ નઃ ।
ભ્રાતેન્દ્રસ્ય સખા મમ ॥ ૬.૦૫૫.૦૫
આજાસઃ પૂષણં રથે નિશ઼ૃમ્ભાસ્તે જનશ્રિયમ્ ।
દેવં વહન્તુ બિભ્રતઃ ॥ ૬.૦૫૫.૦૬
ય એનમાદિદેશતિ કરમ્ભાદિતિ પૂષણમ્ ।
ન તેન દેવ આદિશે ॥ ૬.૦૫૬.૦૧

ઉત ઘા સ રથીતમઃ સખ્યા સત્પતિર્યુજા ।

ઇન્દ્રો વૃત્રાણિ જિઘ્નતે ॥ ૬.૦૫૬.૦૨

ઉતાદઃ પરુષે ગવિ સૂરશ્ચક્રં હિરણ્યયમ્ ।

ન્યૈરયદ્રથીતમઃ ॥ ૬.૦૫૬.૦૩

યદદ્ય ત્વા પુરુષ્ટુત બ્રવામ દસ્ર મન્તુમઃ ।

તત્સુ નો મન્મ સાધય ॥ ૬.૦૫૬.૦૪

ઇમં ચ નો ગવેષણં સાતયે સીષધો ગણમ્ ।

આરાત્પૂષન્નસિ શ્રુતઃ ॥ ૬.૦૫૬.૦૫

આ તે સ્વસ્તિમીમહ આરેઅઘામુપાવસુમ્ ।

અદ્યા ચ સર્વતાતયે શ્વશ્ચ સર્વતાતયે ॥ ૬.૦૫૬.૦૬

ઇન્દ્રા નુ પૂષણા વયં સખ્યાય સ્વસ્તયે ।

હુવેમ વાજસાતયે ॥ ૬.૦૫૭.૦૧

સોમમન્ય ઉપાસદત્પાતવે ચમ્વોઃ સુતમ્ ।

કરમ્ભમન્ય ઇચ્છતિ ॥ ૬.૦૫૭.૦૨

અજા અન્યસ્ય વહ્નયો હરી અન્યસ્ય સમ્ભૃતા ।

તાભ્યાં વૃત્રાણિ જિઘ્નતે ॥ ૬.૦૫૭.૦૩

યદિન્દ્રો અનયદ્રિતો મહીરપો વૃષન્તમઃ ।

તત્ર પૂષાભવત્સચા ॥ ૬.૦૫૭.૦૪

તાં પૂષ્ણઃ સુમતિં વયં વૃક્ષસ્ય પ્ર વયામિવ ।

ઇન્દ્રસ્ય ચા રભામહે ॥ ૬.૦૫૭.૦૫

ઉત્પૂષણં યુવામહેઽભીશૂઁરિવ સારથિઃ ।

મહ્યા ઇન્દ્રં સ્વસ્તયે ॥ ૬.૦૫૭.૦૬

શુક્રં તે અન્યદ્યજતં તે અન્યદ્વિષુરૂપે અહની દ્યૌરિવાસિ ।

વિશ્વા હિ માયા અવસિ સ્વધાવો ભદ્રા તે પૂષન્નિહ રાતિરસ્તુ ॥ ૬.૦૫૮.૦૧

અજાશ્વઃ પશુપા વાજપસ્ત્યો ધિયંજિન્વો ભુવને વિશ્વે અર્પિતઃ ।

અષ્ટ્રાં પૂષા શિથિરામુદ્વરીવૃજત્સંચક્ષાણો ભુવના દેવ ઈયતે ॥ ૬.૦૫૮.૦૨

યાસ્તે પૂષન્નાવો અન્તઃ સમુદ્રે હિરણ્યયીરન્તરિક્ષે ચરન્તિ ।

તાભિર્યાસિ દૂત્યાં સૂર્યસ્ય કામેન કૃત શ્રવ ઇચ્છમાનઃ ॥ ૬.૦૫૮.૦૩
પૂષા સુબન્ધુર્દિવ આ પૃથિવ્યા ઇળસ્પતિર્મઘવા દસ્મવર્ચાઃ ।
યં દેવાસો અદદુઃ સૂર્યાયૈ કામેન કૃતં તવસં સ્વઞ્ચમ્ ॥ ૬.૦૫૮.૦૪

પ્ર નુ વોચા સુતેષુ વાં વીર્યાઉ યાનિ ચક્રથુઃ ।
હતાસો વાં પિતરો દેવશત્રવ ઇન્દ્રાગ્ની જીવથો યુવમ્ ॥ ૬.૦૫૯.૦૧
બળિત્થા મહિમા વામિન્દ્રાગ્ની પનિષ્ઠ આ ।
સમાનો વાં જનિતા ભ્રાતરા યુવં યમાવિહેહમાતરા ॥ ૬.૦૫૯.૦૨
ઓકિવાંસા સુતે સચાઁ અશ્વા સપ્તી ઇવાદને ।
ઇન્દ્રા ન્વ૧ગ્ની અવસેહ વજ્રિણા વયં દેવા હવામહે ॥ ૬.૦૫૯.૦૩
ય ઇન્દ્રાગ્ની સુતેષુ વાં સ્તવત્તેષ્વૃતાવૃધા ।
જોષવાકં વદતઃ પજ્રહોષિણા ન દેવા ભસથશ્ચન ॥ ૬.૦૫૯.૦૪
ઇન્દ્રાગ્ની કો અસ્ય વાં દેવૌ મર્તશ્ચિકેતતિ ।
વિષૂચો અશ્વાન્યુયુજાન ઈયત એકઃ સમાન આ રથે ॥ ૬.૦૫૯.૦૫
ઇન્દ્રાગ્ની અપાદિયં પૂર્વાગાત્પદ્વતીભ્યઃ ।
હિત્વી શિરો જિહ્વયા વાવદચ્ચરત્ત્રિંશત્પદા ન્યક્રમીત્ ॥ ૬.૦૫૯.૦૬
ઇન્દ્રાગ્ની આ હિ તન્વતે નરો ધન્વાનિ બાહ્વોઃ ।
મા નો અસ્મિન્મહાધને પરા વર્ક્તં ગવિષ્ટિષુ ॥ ૬.૦૫૯.૦૭
ઇન્દ્રાગ્ની તપન્તિ માઘા અર્યો અરાતયઃ ।
અપ દ્વેષાંસ્યા કૃતં યુયુતં સૂર્યાદધિ ॥ ૬.૦૫૯.૦૮
ઇન્દ્રાગ્ની યુવોરપિ વસુ દિવ્યાનિ પાર્થિવા ।
આ ન ઇહ પ્ર યચ્છતં રયિં વિશ્વાયુપોષસમ્ ॥ ૬.૦૫૯.૦૯
ઇન્દ્રાગ્ની ઉક્થવાહસા સ્તોમેભિર્હવનશ્રુતા ।
વિશ્વાભિર્ગીર્ભિરા ગતમસ્ય સોમસ્ય પીતયે ॥ ૬.૦૫૯.૧૦

શ્નથદ્વૃત્રમુત સનોતિ વાજમિન્દ્રા યો અગ્ની સહુરી સપર્યાત્ ।
ઇરજ્યન્તા વસવ્યસ્ય ભૂરેઃ સહસ્તમા સહસા વાજયન્તા ॥ ૬.૦૬૦.૦૧
તા યોધિષ્ટમભિ ગા ઇન્દ્ર નૂનમપઃ સ્વરુષસો અગ્ન ઊળ્હાઃ ।
દિશઃ સ્વરુષસ ઇન્દ્ર ચિત્રા અપો ગા અગ્ને યુવસે નિયુત્વાન્ ॥ ૬.૦૬૦.૦૨

આ વૃત્રહણા વૃત્રહભિઃ શુષ્મૈરિન્દ્ર યાતં નમોભિરગ્ને અર્વાક્ ।
યુવં રાધોભિરકવેભિરિન્દ્રાગ્ને અસ્મે ભવતમુત્તમેભિઃ ॥ ૬.૦૬૦.૦૩
તા હુવે યયોરિદં પપ્ને વિશ્વં પુરા કૃતમ્ ।
ઇન્દ્રાગ્ની ન મર્ધતઃ ॥ ૬.૦૬૦.૦૪
ઉગ્રા વિઘનિના મૃધ ઇન્દ્રાગ્ની હવામહે ।
તા નો મૃળાત ઈદૃશે ॥ ૬.૦૬૦.૦૫
હતો વૃત્રાણ્યાર્યા હતો દાસાનિ સત્પતી ।
હતો વિશ્વા અપ દ્વિષઃ ॥ ૬.૦૬૦.૦૬
ઇન્દ્રાગ્ની યુવામિમેઽભિ સ્તોમા અનૂષત ।
પિબતં શમ્ભુવા સુતમ્ ॥ ૬.૦૬૦.૦૭
યા વાં સન્તિ પુરુસ્પૃહો નિયુતો દાશુષે નરા ।
ઇન્દ્રાગ્ની તાભિરા ગતમ્ ॥ ૬.૦૬૦.૦૮
તાભિરા ગચ્છતં નરોપેદં સવનં સુતમ્ ।
ઇન્દ્રાગ્ની સોમપીતયે ॥ ૬.૦૬૦.૦૯
તમીળિષ્વ યો અર્ચિષા વના વિશ્વા પરિષ્વજત્ ।
કૃષ્ણા કૃણોતિ જિહ્વયા ॥ ૬.૦૬૦.૧૦
ય ઇદ્ધ આવિવાસતિ સુમ્નમિન્દ્રસ્ય મર્ત્યઃ ।
દ્યુમ્નાય સુતરા અપઃ ॥ ૬.૦૬૦.૧૧
તા નો વાજવતીરિષ આશૂન્પિપૃતમર્વતઃ ।
ઇન્દ્રમગ્નિં ચ વોળ્હવે ॥ ૬.૦૬૦.૧૨
ઉભા વામિન્દ્રાગ્ની આહુવધ્યા ઉભા રાધસઃ સહ માદયધ્યૈ ।
ઉભા દાતારાવિષાં રયીણામુભા વાજસ્ય સાતયે હુવે વામ્ ॥ ૬.૦૬૦.૧૩
આ નો ગવ્યેભિરશ્વ્યૈર્વસવ્યૈરુપ ગચ્છતમ્ ।
સખાયૌ દેવૌ સખ્યાય શમ્ભુવેન્દ્રાગ્ની તા હવામહે ॥ ૬.૦૬૦.૧૪
ઇન્દ્રાગ્ની શ઼ૃણુતં હવં યજમાનસ્ય સુન્વતઃ ।
વીતં હવ્યાન્યા ગતં પિબતં સોમ્યં મધુ ॥ ૬.૦૬૦.૧૫
ઇયમદદાદ્રભસમૃણચ્યુતં દિવોદાસં વધ્ર્યશ્વાય દાશુષે ।

યા શશ્વન્તમાચખાદાવસં પણિં તા તે દાત્રાણિ તવિષા સરસ્વતિ ॥ ૬.૦૬૧.૦૧
ઇયં શુષ્મેભિર્બિસખા ઇવારુજત્સાનુ ગિરીણાં તવિષેભિરૂર્મિભિઃ ।
પારાવતઘ્નીમવસે સુવૃક્તિભિઃ સરસ્વતીમા વિવાસેમ ધીતિભિઃ ॥ ૬.૦૬૧.૦૨
સરસ્વતિ દેવનિદો નિ બર્હય પ્રજાં વિશ્વસ્ય બૃસયસ્ય માયિનઃ ।
ઉત ક્ષિતિભ્યોઽવનીરવિન્દો વિષમેભ્યો અસ્રવો વાજિનીવતિ ॥ ૬.૦૬૧.૦૩
પ્ર ણો દેવી સરસ્વતી વાજેભિર્વાજિનીવતી ।
ધીનામવિત્ર્યવતુ ॥ ૬.૦૬૧.૦૪
યસ્ત્વા દેવિ સરસ્વત્યુપબ્રૂતે ધને હિતે ।
ઇન્દ્રં ન વૃત્રતૂર્યે ॥ ૬.૦૬૧.૦૫
ત્વં દેવિ સરસ્વત્યવા વાજેષુ વાજિનિ ।
રદા પૂષેવ નઃ સનિમ્ ॥ ૬.૦૬૧.૦૬
ઉત સ્યા નઃ સરસ્વતી ઘોરા હિરણ્યવર્તનિઃ ।
વૃત્રઘ્ની વષ્ટિ સુષ્ટુતિમ્ ॥ ૬.૦૬૧.૦૭
યસ્યા અનન્તો અહ્રુતસ્ત્વેષશ્ચરિષ્ણુરર્ણવઃ ।
અમશ્ચરતિ રોરુવત્ ॥ ૬.૦૬૧.૦૮
સા નો વિશ્વા અતિ દ્વિષઃ સ્વસૄરન્યા ઋતાવરી ।
અતન્નહેવ સૂર્યઃ ॥ ૬.૦૬૧.૦૯
ઉત નઃ પ્રિયા પ્રિયાસુ સપ્તસ્વસા સુજુષ્ટા ।
સરસ્વતી સ્તોમ્યા ભૂત્ ॥ ૬.૦૬૧.૧૦
આપપ્રુષી પાર્થિવાન્યુરુ રજો અન્તરિક્ષમ્ ।
સરસ્વતી નિદસ્પાતુ ॥ ૬.૦૬૧.૧૧
ત્રિષધસ્થા સપ્તધાતુઃ પઞ્ચ જાતા વર્ધયન્તી ।
વાજેવાજે હવ્યા ભૂત્ ॥ ૬.૦૬૧.૧૨
પ્ર યા મહિમ્ના મહિનાસુ ચેકિતે દ્યુમ્નેભિરન્યા અપસામપસ્તમા ।
રથ ઇવ બૃહતી વિભ્વને કૃતોપસ્તુત્યા ચિકિતુષા સરસ્વતી ॥ ૬.૦૬૧.૧૩
સરસ્વત્યભિ નો નેષિ વસ્યો માપ સ્ફરીઃ પયસા મા ન આ ધક્ ।
જુષસ્વ નઃ સખ્યા વેશ્યા ચ મા ત્વત્ક્ષેત્રાણ્યરણાનિ ગન્મ ॥ ૬.૦૬૧.૧૪

સ્તુષે નરા દિવો અસ્ય પ્રસન્તાશ્વિના હુવે જરમાણો અર્કૈઃ ।
યા સદ્ય ઉસ્રા વ્યુષિ જ્મો અન્તાન્યુયૂષતઃ પર્યુરૂ વરાંસિ ॥ ૬.૦૬૨.૦૧
તા યજ્ઞમા શુચિભિશ્ચક્રમાણા રથસ્ય ભાનું રુરુચૂ રજોભિઃ ।
પુરૂ વરાંસ્યમિતા મિમાનાપો ધન્વાન્યતિ યાથો અજ્રાન્ ॥ ૬.૦૬૨.૦૨
તા હ ત્યદ્વર્તિર્યદરધ્રમુગ્રેત્થા ધિય ઊહથુઃ શશ્વદશ્વૈઃ ।
મનોજવેભિરિષિરૈઃ શયધ્યૈ પરિ વ્યથિર્દાશુષો મર્ત્યસ્ય ॥ ૬.૦૬૨.૦૩
તા નવ્યસો જરમાણસ્ય મન્મોપ ભૂષતો યુયુજાનસપ્તી ।
શુભં પૃક્ષમિષમૂર્જં વહન્તા હોતા યક્ષત્પ્રત્નો અધ્રુગ્યુવાના ॥ ૬.૦૬૨.૦૪
તા વલ્ગૂ દસ્રા પુરુશાકતમા પ્રત્ના નવ્યસા વચસા વિવાસે ।
યા શંસતે સ્તુવતે શમ્ભવિષ્ઠા બભૂવતુર્ગૃણતે ચિત્રરાતી ॥ ૬.૦૬૨.૦૫
તા ભુજ્યું વિભિરદ્ભ્યઃ સમુદ્રાત્તુગ્રસ્ય સૂનુમૂહથૂ રજોભિઃ ।
અરેણુભિર્યોજનેભિર્ભુજન્તા પતત્રિભિરર્ણસો નિરુપસ્થાત્ ॥ ૬.૦૬૨.૦૬
વિ જયુષા રથ્યા યાતમદ્રિં શ્રુતં હવં વૃષણા વધ્રિમત્યાઃ ।
દશસ્યન્તા શયવે પિપ્યથુર્ગામિતિ ચ્યવાના સુમતિં ભુરણ્યૂ ॥ ૬.૦૬૨.૦૭
યદ્રોદસી પ્રદિવો અસ્તિ ભૂમા હેળો દેવાનામુત મર્ત્યત્રા ।
તદાદિત્યા વસવો રુદ્રિયાસો રક્ષોયુજે તપુરઘં દધાત ॥ ૬.૦૬૨.૦૮
ય ઈં રાજાનાવૃતુથા વિદધદ્રજસો મિત્રો વરુણશ્ચિકેતત્ ।
ગમ્ભીરાય રક્ષસે હેતિમસ્ય દ્રોઘાય ચિદ્વચસ આનવાય ॥ ૬.૦૬૨.૦૯
અન્તરૈશ્ચક્રૈસ્તનયાય વર્તિર્દ્યુમતા યાતં નૃવતા રથેન ।
સનુત્યેન ત્યજસા મર્ત્યસ્ય વનુષ્યતામપિ શીર્ષા વવૃક્તમ્ ॥ ૬.૦૬૨.૧૦
આ પરમાભિરુત મધ્યમાભિર્નિયુદ્ભિર્યાતમવમાભિરર્વાક્ ।
દૃળ્હસ્ય ચિદ્ગોમતો વિ વ્રજસ્ય દુરો વર્તં ગૃણતે ચિત્રરાતી ॥ ૬.૦૬૨.૧૧

ક્વ૧ ત્યા વલ્ગૂ પુરુહૂતાદ્ય દૂતો ન સ્તોમોઽવિદન્નમસ્વાન્ ।
આ યો અર્વાઙ્નાસત્યા વવર્ત પ્રેષ્ઠા હ્યસથો અસ્ય મન્મન્ ॥ ૬.૦૬૩.૦૧
અરં મે ગન્તં હવનાયાસ્મૈ ગૃણાના યથા પિબાથો અન્ધઃ ।
પરિ હ ત્યદ્વર્તિર્યાથો રિષો ન યત્પરો નાન્તરસ્તુતુર્યાત્ ॥ ૬.૦૬૩.૦૨
અકારિ વામન્ધસો વરીમન્નસ્તારિ બર્હિઃ સુપ્રાયણતમમ્ ।

ઉત્તાનહસ્તો યુવયુર્વવન્દા વાં નક્ષન્તો અદ્રય આઞ્જન્ ॥ ૬.૦૬૩.૦૩
ઊર્ધ્વો વામગ્નિરધ્વરેષ્વસ્થાત્પ્ર રાતિરેતિ જૂર્ણિની ઘૃતાચી ।
પ્ર હોતા ગૂર્તમના ઉરાણોઽયુક્ત યો નાસત્યા હવીમન્ ॥ ૬.૦૬૩.૦૪
અધિ શ્રિયે દુહિતા સૂર્યસ્ય રથં તસ્થૌ પુરુભુજા શતોતિમ્ ।
પ્ર માયાભિર્માયિના ભૂતમત્ર નરા નૃતૂ જનિમન્યજ્ઞિયાનામ્ ॥ ૬.૦૬૩.૦૫
યુવં શ્રીભિર્દર્શતાભિરાભિઃ શુભે પુષ્ટિમૂહથુઃ સૂર્યાયાઃ ।
પ્ર વાં વયો વપુષેઽનુ પપ્તન્નક્ષદ્વાણી સુષ્ટુતા ધિષ્ણ્યા વામ્ ॥ ૬.૦૬૩.૦૬
આ વાં વયોઽશ્વાસો વહિષ્ઠા અભિ પ્રયો નાસત્યા વહન્તુ ।
પ્ર વાં રથો મનોજવા અસર્જીષઃ પૃક્ષ ઇષિધો અનુ પૂર્વીઃ ॥ ૬.૦૬૩.૦૭
પુરુ હિ વાં પુરુભુજા દેષ્ણં ધેનું ન ઇષં પિન્વતમસક્રામ્ ।
સ્તુતશ્ચ વાં માધ્વી સુષ્ટુતિશ્ચ રસાશ્ચ યે વામનુ રાતિમગ્મન્ ॥ ૬.૦૬૩.૦૮
ઉત મ ઋજ્રે પુરયસ્ય રઘ્વી સુમીળ્હે શતં પેરુકે ચ પક્વા ।
શાણ્ડો દાદ્ધિરણિનઃ સ્મદ્દિષ્ટીન્દશ વશાસો અભિષાચ ઋષ્વાન્ ॥ ૬.૦૬૩.૦૯
સં વાં શતા નાસત્યા સહસ્રાશ્વાનાં પુરુપન્થા ગિરે દાત્ ।
ભરદ્વાજાય વીર નૂ ગિરે દાદ્ધતા રક્ષાંસિ પુરુદંસસા સ્યુઃ ॥ ૬.૦૬૩.૧૦
આ વાં સુમ્ને વરિમન્સૂરિભિઃ ષ્યામ્ ॥ ૬.૦૬૩.૧૧

ઉદુ શ્રિય ઉષસો રોચમાના અસ્થુરપાં નોર્મયો રુશન્તઃ ।
કૃણોતિ વિશ્વા સુપથા સુગાન્યભૂદુ વસ્વી દક્ષિણા મઘોની ॥ ૬.૦૬૪.૦૧
ભદ્રા દદૃક્ષ ઉર્વિયા વિ ભાસ્યુત્તે શોચિર્ભાનવો દ્યામપપ્તન્ ।
આવિર્વક્ષઃ કૃણુષે શુમ્ભમાનોષો દેવિ રોચમાના મહોભિઃ ॥ ૬.૦૬૪.૦૨
વહન્તિ સીમરુણાસો રુશન્તો ગાવઃ સુભગામુર્વિયા પ્રથાનામ્ ।
અપેજતે શૂરો અસ્તેવ શત્રૂન્બાધતે તમો અજિરો ન વોળ્હા ॥ ૬.૦૬૪.૦૩
સુગોત તે સુપથા પર્વતેષ્વવાતે અપસ્તરસિ સ્વભાનો ।
સા ન આ વહ પૃથુયામન્નૃષ્વે રયિં દિવો દુહિતરિષયધ્યૈ ॥ ૬.૦૬૪.૦૪
સા વહ યોક્ષભિરવાતોષો વરં વહસિ જોષમનુ ।
ત્વં દિવો દુહિતર્યા હ દેવી પૂર્વહૂતૌ મંહના દર્શતા ભૂઃ ॥ ૬.૦૬૪.૦૫
ઉત્તે વયશ્ચિદ્વસતેરપપ્તન્નરશ્ચ યે પિતુભાજો વ્યુષ્ટૌ ।

અમા સતે વહસિ ભૂરિ વામમુષો દેવિ દાશુષે મર્ત્યાય ॥ ૬.૦૬૪.૦૬

એષા સ્યા નો દુહિતા દિવોજાઃ ક્ષિતીરુચ્છન્તી માનુષીરજીગઃ ।
યા ભાનુના રુશતા રામ્યાસ્વજ્ઞાયિ તિરસ્તમસશ્ચિદક્તૂન્ ॥ ૬.૦૬૫.૦૧
વિ તદ્યયુરરુણયુગ્ભિરશ્વૈશ્ચિત્રં ભાન્ત્યુષસશ્ચન્દ્રરથાઃ ।
અગ્રં યજ્ઞસ્ય બૃહતો નયન્તીર્વિ તા બાધન્તે તમ ઊર્મ્યાયાઃ ॥ ૬.૦૬૫.૦૨
શ્રવો વાજમિષમૂર્જં વહન્તીર્નિ દાશુષ ઉષસો મર્ત્યાય ।
મઘોનીર્વીરવત્પત્યમાના અવો ધાત વિધતે રત્નમદ્ય ॥ ૬.૦૬૫.૦૩
ઇદા હિ વો વિધતે રત્નમસ્તીદા વીરાય દાશુષ ઉષાસઃ ।
ઇદા વિપ્રાય જરતે યદુક્થા નિ ષ્મ માવતે વહથા પુરા ચિત્ ॥ ૬.૦૬૫.૦૪
ઇદા હિ ત ઉષો અદ્રિસાનો ગોત્રા ગવામઙ્ગિરસો ગૃણન્તિ ।
વ્ય૧ર્કેણ બિભિદુર્બ્રહ્મણા ચ સત્યા નૃણામભવદ્દેવહૂતિઃ ॥ ૬.૦૬૫.૦૫
ઉચ્છા દિવો દુહિતઃ પ્રત્નવન્નો ભરદ્વાજવદ્વિધતે મઘોનિ ।
સુવીરં રયિં ગૃણતે રિરીહ્યુરુગાયમધિ ધેહિ શ્રવો નઃ ॥ ૬.૦૬૫.૦૬

વપુર્નુ તચ્ચિકિતુષે ચિદસ્તુ સમાનં નામ ધેનુ પત્યમાનમ્ ।
મર્તેષ્વન્યદ્દોહસે પીપાય સકૃચ્છુક્રં દુદુહે પૃશ્નિરૂધઃ ॥ ૬.૦૬૬.૦૧
યે અગ્નયો ન શોશુચન્નિધાના દ્વિર્યત્ત્રિર્મરુતો વાવૃધન્ત ।
અરેણવો હિરણ્યયાસ એષાં સાકં નૃમ્ણૈઃ પૌંસ્યેભિશ્ચ ભૂવન્ ॥ ૬.૦૬૬.૦૨
રુદ્રસ્ય યે મીળ્હુષઃ સન્તિ પુત્રા યાઁશ્ચો નુ દાધૃવિર્ભરધ્યૈ ।
વિદે હિ માતા મહો મહી ષા સેત્પૃશ્નિઃ સુભ્વે૩ ગર્ભમાધાત્ ॥ ૬.૦૬૬.૦૩
ન ય ઈષન્તે જનુષોઽયા ન્વ૧ન્તઃ સન્તોઽવદ્યાનિ પુનાનાઃ ।
નિર્યદ્દુહ્રે શુચયોઽનુ જોષમનુ શ્રિયા તન્વમુક્ષમાણાઃ ॥ ૬.૦૬૬.૦૪
મક્ષૂ ન યેષુ દોહસે ચિદયા આ નામ ધૃષ્ણુ મારુતં દધાનાઃ ।
ન યે સ્તૌના અયાસો મહ્ના નૂ ચિત્સુદાનુરવ યાસદુગ્રાન્ ॥ ૬.૦૬૬.૦૫
ત ઇદુગ્રાઃ શવસા ધૃષ્ણુષેણા ઉભે યુજન્ત રોદસી સુમેકે ।
અધ સ્મૈષુ રોદસી સ્વશોચિરામવત્સુ તસ્થૌ ન રોકઃ ॥ ૬.૦૬૬.૦૬
અનેનો વો મરુતો યામો અસ્ત્વનશ્વશ્ચિદ્યમજત્યરથીઃ ।
અનવસો અનભીશૂ રજસ્તૂર્વિ રોદસી પથ્યા યાતિ સાધન્ ॥ ૬.૦૬૬.૦૭

નાસ્ય વર્તા ન તરુતા ન્વસ્તિ મરુતો યમવથ વાજસાતૌ ।
તોકે વા ગોષુ તનયે યમપ્સુ સ વ્રજં દર્તા પાર્યે અધ દ્યોઃ ॥ ૬.૦૬૬.૦૮
પ્ર ચિત્રમર્કં ગૃણતે તુરાય મારુતાય સ્વતવસે ભરધ્વમ્ ।
યે સહાંસિ સહસા સહન્તે રેજતે અગ્ને પૃથિવી મખેભ્યઃ ॥ ૬.૦૬૬.૦૯
ત્વિષીમન્તો અધ્વરસ્યેવ દિદ્યુત્તૃષુચ્યવસો જુહ્વોઽ નાગ્નેઃ ।
અર્ચત્રયો ધુનયો ન વીરા ભ્રાજજ્જન્માનો મરુતો અધૃષ્ટાઃ ॥ ૬.૦૬૬.૧૦
તં વૃધન્તં મારુતં ભ્રાજદૃષ્ટિં રુદ્રસ્ય સૂનું હવસા વિવાસે ।
દિવઃ શર્ધાય શુચયો મનીષા ગિરયો નાપ ઉગ્રા અસ્પૃધ્રન્ ॥ ૬.૦૬૬.૧૧

વિશ્વેષાં વઃ સતાં જ્યેષ્ઠતમા ગીર્ભિર્મિત્રાવરુણા વાવૃધધ્યૈ ।
સં યા રશ્મેવ યમતુર્યમિષ્ઠા દ્વા જનાઁ અસમા બાહુભિઃ સ્વૈઃ ॥ ૬.૦૬૭.૦૧
ઇયં મદ્વાં પ્ર સ્તૃણીતે મનીષોપ પ્રિયા નમસા બર્હિરચ્છ ।
યન્તં નો મિત્રાવરુણાવધૃષ્ટં છર્દિર્યદ્વાં વરૂથ્યં સુદાનૂ ॥ ૬.૦૬૭.૦૨
આ યાતં મિત્રાવરુણા સુશસ્ત્યુપ પ્રિયા નમસા હૂયમાના ।
સં યાવપ્નઃસ્થો અપસેવ જનાઞ્છ્રુધીયતશ્ચિદ્યતથો મહિત્વા ॥ ૬.૦૬૭.૦૩
અશ્વા ન યા વાજિના પૂતબન્ધૂ ઋતા યદ્ગર્ભમદિતિર્ભરધ્યૈ ।
પ્ર યા મહિ મહાન્તા જાયમાના ઘોરા મર્તાય રિપવે નિ દીધઃ ॥ ૬.૦૬૭.૦૪
વિશ્વે યદ્વાં મંહના મન્દમાનાઃ ક્ષત્રં દેવાસો અદધુઃ સજોષાઃ ।
પરિ યદ્ભૂથો રોદસી ચિદુર્વી સન્તિ સ્પશો અદબ્ધાસો અમૂરાઃ ॥ ૬.૦૬૭.૦૫
તા હિ ક્ષત્રં ધારયેથે અનુ દ્યૂન્દૃંહેથે સાનુમુપમાદિવ દ્યોઃ ।
દૃળ્હો નક્ષત્ર ઉત વિશ્વદેવો ભૂમિમાતાન્દ્યાં ધાસિનાયોઃ ॥ ૬.૦૬૭.૦૬
તા વિગ્રં ધૈથે જઠરં પૃણધ્યા આ યત્સદ્મ સભૃતયઃ પૃણન્તિ ।
ન મૃષ્યન્તે યુવતયોઽવાતા વિ યત્પયો વિશ્વજિન્વા ભરન્તે ॥ ૬.૦૬૭.૦૭
તા જિહ્વયા સદમેદં સુમેધા આ યદ્વાં સત્યો અરતિરૃતે ભૂત્ ।
તદ્વાં મહિત્વં ઘૃતાન્નાવસ્તુ યુવં દાશુષે વિ ચયિષ્ટમંહઃ ॥ ૬.૦૬૭.૦૮
પ્ર યદ્વાં મિત્રાવરુણા સ્પૂર્ધન્પ્રિયા ધામ યુવધિતા મિનન્તિ ।
ન યે દેવાસ ઓહસા ન મર્તા અયજ્ઞસાચો અપ્યો ન પુત્રાઃ ॥ ૬.૦૬૭.૦૯
વિ યદ્વાચં કીસ્તાસો ભરન્તે શંસન્તિ કે ચિન્નિવિદો મનાનાઃ ।

આદ્ધાં બ્રવામ સત્યાન્યુક્થા નકિર્દેવેભિર્યતથો મહિત્વા ॥ ૬.૦૬૭.૧૦

અવોરિત્થા વાં છર્દિષો અભિષ્ટૌ યુવોર્મિત્રાવરુણાવસ્કૃધોયુ ।

અનુ યદ્ગાવઃ સ્ફુરાનૃજિપ્યં ધૃષ્ણું યદ્રણે વૃષણં યુનજન્ ॥ ૬.૦૬૭.૧૧

શ્રુષ્ટી વાં યજ્ઞ ઉદ્યતઃ સજોષા મનુષ્વદ્વૃક્તબર્હિષો યજધ્યૈ ।

આ ય ઇન્દ્રાવરુણાવિષે અદ્ય મહે સુમ્નાય મહ આવવર્તત્ ॥ ૬.૦૬૮.૦૧

તા હિ શ્રેષ્ઠા દેવતાતા તુજા શૂરાણાં શવિષ્ઠા તા હિ ભૂતમ્ ।

મઘોનાં મંહિષ્ઠા તુવિશુષ્મ ઋતેન વૃત્રતુરા સર્વસેના ॥ ૬.૦૬૮.૦૨

તા ગૃણીહિ નમસ્યેભિઃ શૂષૈઃ સુમ્નેભિરિન્દ્રાવરુણા ચકાના ।

વજ્રેણાન્યઃ શવસા હન્તિ વૃત્રં સિષક્ત્યન્યો વૃજનેષુ વિપ્રઃ ॥ ૬.૦૬૮.૦૩

ગ્નાશ્ચ યન્નરશ્ચ વાવૃધન્ત વિશ્વે દેવાસો નરાં સ્વગૂર્તાઃ ।

પ્રૈભ્ય ઇન્દ્રાવરુણા મહિત્વા દ્યૌશ્ચ પૃથિવિ ભૂતમુર્વી ॥ ૬.૦૬૮.૦૪

સ ઇત્સુદાનુઃ સ્વવાઁ ઋતાવેન્દ્રા યો વાં વરુણ દાશતિ ત્મન્ ।

ઇષા સ દ્વિષસ્તરેદ્દાસ્વાન્વંસદ્રયિં રયિવતશ્ચ જનાન્ ॥ ૬.૦૬૮.૦૫

યં યુવં દાશ્વધ્વરાય દેવા રયિં ધત્થો વસુમન્તં પુરુક્ષુમ્ ।

અસ્મે સ ઇન્દ્રાવરુણાવપિ ષ્યાત્પ્ર યો ભનક્તિ વનુષામશસ્તીઃ ॥ ૬.૦૬૮.૦૬

ઉત નઃ સુત્રાત્રો દેવગોપાઃ સૂરિભ્ય ઇન્દ્રાવરુણા રયિઃ ષ્યાત્ ।

યેષાં શુષ્મઃ પૃતનાસુ સાહ્વાન્પ્ર સદ્યો દ્યુમ્ના તિરતે તતુરિઃ ॥ ૬.૦૬૮.૦૭

નૂ ન ઇન્દ્રાવરુણા ગૃણાના પૃઙ્ક્તં રયિં સૌશ્રવસાય દેવા ।

ઇત્થા ગૃણન્તો મહિનસ્ય શર્ધોऽપો ન નાવા દુરિતા તરેમ ॥ ૬.૦૬૮.૦૮

પ્ર સમ્રાજે બૃહતે મન્મ નુ પ્રિયમર્ચ દેવાય વરુણાય સપ્રથઃ ।

અયં ય ઉર્વી મહિના મહિવ્રતઃ ક્રત્વા વિભાત્યજરો ન શોચિષા ॥ ૬.૦૬૮.૦૯

ઇન્દ્રાવરુણા સુતપાવિમં સુતં સોમં પિબતં મદ્યં ધૃતવ્રતા ।

યુવો રથો અધ્વરં દેવવીતયે પ્રતિ સ્વસરમુપ યાતિ પીતયે ॥ ૬.૦૬૮.૧૦

ઇન્દ્રાવરુણા મધુમત્તમસ્ય વૃષ્ણઃ સોમસ્ય વૃષણા વૃષેથામ્ ।

ઇદં વામન્ધઃ પરિષિક્તમસ્મે આસદ્યાસ્મિન્બર્હિષિ માદયેથામ્ ॥ ૬.૦૬૮.૧૧

સં વાં કર્મણા સમિષા હિનોમીન્દ્રાવિષ્ણૂ અપસસ્પારે અસ્ય ।

જુષેથાં યજ્ઞં દ્રવિણં ચ ધત્તમરિષ્ટૈર્નઃ પથિભિઃ પારયન્તા ॥ ૬.૦૬૯.૦૧

યા વિશ્વાસાં જનિતારા મતીનામિન્દ્રાવિષ્ણૂ કલશા સોમધાના ।
પ્ર વાં ગિરઃ શસ્યમાના અવન્તુ પ્ર સ્તોમાસો ગીયમાનાસો અર્કૈઃ ॥ ૬.૦૬૯.૦૨
ઇન્દ્રાવિષ્ણૂ મદપતી મદાનામા સોમં યાતં દ્રવિણો દધાના ।
સં વામઞ્જન્ત્વક્તુભિર્મતીનાં સં સ્તોમાસઃ શસ્યમાનાસ ઉક્થૈઃ ॥ ૬.૦૬૯.૦૩
આ વામશ્વાસો અભિમાતિષાહ ઇન્દ્રાવિષ્ણૂ સધમાદો વહન્તુ ।
જુષેથાં વિશ્વા હવના મતીનામુપ બ્રહ્માણિ શૃણુતં ગિરો મે ॥ ૬.૦૬૯.૦૪
ઇન્દ્રાવિષ્ણૂ તત્પનયાય્યં વાં સોમસ્ય મદ ઉરુ ચક્રમાથે ।
અકૃણુતમન્તરિક્ષં વરીયોઽપ્રથતં જીવસે નો રજાંસિ ॥ ૬.૦૬૯.૦૫
ઇન્દ્રાવિષ્ણૂ હવિષા વાવૃધાનાગ્રાદ્વાના નમસા રાતહવ્યા ।
ઘૃતાસુતી દ્રવિણં ધત્તમસ્મે સમુદ્રઃ સ્થઃ કલશઃ સોમધાનઃ ॥ ૬.૦૬૯.૦૬
ઇન્દ્રાવિષ્ણૂ પિબતં મધ્વો અસ્ય સોમસ્ય દસ્રા જઠરં પૃણેથામ્ ।
આ વામન્ધાંસિ મદિરાણ્યગ્મન્નુપ બ્રહ્માણિ શૃણુતં હવં મે ॥ ૬.૦૬૯.૦૭
ઉભા જિગ્યથુર્ન પરા જયેથે ન પરા જિગ્યે કતરશ્ચનૈનોઃ ।
ઇન્દ્રશ્ચ વિષ્ણો યદપસ્પૃધેથાં ત્રેધા સહસ્રં વિ તદૈરયેથામ્ ॥ ૬.૦૬૯.૦૮

ઘૃતવતી ભુવનાનામભિશ્રિયોર્વી પૃથ્વી મધુદુઘે સુપેશસા ।
દ્યાવાપૃથિવી વરુણસ્ય ધર્મણા વિષ્કભિતે અજરે ભૂરિરેતસા ॥ ૬.૦૭૦.૦૧
અસશ્ચન્તી ભૂરિધારે પયસ્વતી ઘૃતં દુહાતે સુકૃતે શુચિવ્રતે ।
રાજન્તી અસ્ય ભુવનસ્ય રોદસી અસ્મે રેતઃ સિઞ્ચતં યન્મનુર્હિતમ્ ॥ ૬.૦૭૦.૦૨
યો વામૃજવે ક્રમણાય રોદસી મર્તો દદાશ ધિષણે સ સાધતિ ।
પ્ર પ્રજાભિર્જાયતે ધર્મણસ્પરિ યુવોઃ સિક્તા વિષુરૂપાણિ સવ્રતા ॥ ૬.૦૭૦.૦૩
ઘૃતેન દ્યાવાપૃથિવી અભીવૃતે ઘૃતશ્રિયા ઘૃતપૃચા ઘૃતાવૃધા ।
ઉર્વી પૃથ્વી હોતૃવૂર્યે પુરોહિતે તે ઇદ્વિપ્રા ઈળતે સુમ્નમિષ્ટયે ॥ ૬.૦૭૦.૦૪
મધુ નો દ્યાવાપૃથિવી મિમિક્ષતાં મધુશ્ચુતા મધુદુઘે મધુવ્રતે ।
દધાને યજ્ઞં દ્રવિણં ચ દેવતા મહિ શ્રવો વાજમસ્મે સુવીર્યમ્ ॥ ૬.૦૭૦.૦૫
ઊર્જં નો દ્યૌશ્ચ પૃથિવી ચ પિન્વતાં પિતા માતા વિશ્વવિદા સુદંસસા ।
સંરરાણે રોદસી વિશ્વશમ્ભુવા સનિં વાજં રયિમસ્મે સમિન્વતામ્ ॥ ૬.૦૭૦.૦૬

ઉદુ ષ્ય દેવઃ સવિતા હિરણ્યયા બાહૂ અયંસ્ત સવનાય સુક્રતુઃ ।

ધૃતેન પાણી અભિ પ્રુષ્ણુતે મખો યુવા સુદક્ષો રજસો વિધર્મણિ ॥ ૬.૦૭૧.૦૧

દેવસ્ય વયં સવિતુઃ સવીમનિ શ્રેષ્ઠે સ્યામ વસુનશ્ચ દાવને ।

યો વિશ્વસ્ય દ્વિપદો યશ્ચતુષ્પદો નિવેશને પ્રસવે ચાસિ ભૂમનઃ ॥ ૬.૦૭૧.૦૨

અદબ્ધેભિઃ સવિતઃ પાયુભિષ્ટ્વં શિવેભિરદ્ય પરિ પાહિ નો ગયમ્ ।

હિરણ્યજિહ્વઃ સુવિતાય નવ્યસે રક્ષા માકિર્નો અઘશંસ ઈશત ॥ ૬.૦૭૧.૦૩

ઉદુ ષ્ય દેવઃ સવિતા દમૂના હિરણ્યપાણિઃ પ્રતિદોષમસ્થાત્ ।

અયોહનુર્યજતો મન્દ્રજિહ્વ આ દાશુષે સુવતિ ભૂરિ વામમ્ ॥ ૬.૦૭૧.૦૪

ઉદૂ અયાઁ ઉપવક્તેવ બાહૂ હિરણ્યયા સવિતા સુપ્રતીકા ।

દિવો રોહાંસ્યરુહત્પૃથિવ્યા અરીરમત્પતયત્કચ્ચિદભ્વમ્ ॥ ૬.૦૭૧.૦૫

વામમદ્ય સવિતર્વામમુ શ્વો દિવેદિવે વામમસ્મભ્યં સાવીઃ ।

વામસ્ય હિ ક્ષયસ્ય દેવ ભૂરેરયા ધિયા વામભાજઃ સ્યામ ॥ ૬.૦૭૧.૦૬

ઇન્દ્રાસોમા મહિ તદ્વાં મહિત્વં યુવં મહાનિ પ્રથમાનિ ચક્રથુઃ ।

યુવં સૂર્યં વિવિદથુર્યુવં સ્વ૧ર્વિશ્વા તમાંસ્યહતં નિદશ્ચ ॥ ૬.૦૭૨.૦૧

ઇન્દ્રાસોમા વાસયથ ઉષાસમુત્સૂર્યં નયથો જ્યોતિષા સહ ।

ઉપ દ્યાં સ્કમ્ભથુઃ સ્કમ્ભનેનાપ્રથતં પૃથિવીં માતરં વિ ॥ ૬.૦૭૨.૦૨

ઇન્દ્રાસોમાવહિમપઃ પરિષ્ઠાં હથો વૃત્રમનુ વાં દ્યૌરમન્યત ।

પ્રાર્ણાંસ્યૈરયતં નદીનામા સમુદ્રાણિ પપ્રથુઃ પુરૂણિ ॥ ૬.૦૭૨.૦૩

ઇન્દ્રાસોમા પક્વમામાસ્વન્તર્નિ ગવામિદ્દધથુર્વક્ષણાસુ ।

જગૃભથુરનપિનદ્ધમાસુ રુશચ્ચિત્રાસુ જગતીષ્વન્તઃ ॥ ૬.૦૭૨.૦૪

ઇન્દ્રાસોમા યુવમઙ્ગ તરુત્રમપત્યસાચં શ્રુત્યં રરાથે ।

યુવં શુષ્મં નર્યં ચર્ષણિભ્યઃ સં વિવ્યથુઃ પૃતનાષાહમુગ્રા ॥ ૬.૦૭૨.૦૫

યો અદ્રિભિત્પ્રથમજા ઋતાવા બૃહસ્પતિરાઙ્ગિરસો હવિષ્માન્ ।

દ્વિબર્હજ્મા પ્રાઘર્મસત્પિતા ન આ રોદસી વૃષભો રોરવીતિ ॥ ૬.૦૭૩.૦૧

જનાય ચિદ્ય ઈવત ઉ લોકં બૃહસ્પતિર્દેવહૂતૌ ચકાર ।

ઘ્નન્વૃત્રાણિ વિ પુરો દર્દરીતિ જયઞ્છત્રૂઁરમિત્રાન્પૃત્સુ સાહન્ ॥ ૬.૦૭૩.૦૨

બૃહસ્પતિઃ સમજયદ્વસૂનિ મહો વ્રજાન્ગોમતો દેવ એષઃ ।

અપઃ સિષાસન્સ્વ૧રપ્રતીતો બૃહસ્પતિર્હન્ત્યમિત્રમર્કૈઃ ॥ ૬.૦૭૩.૦૩

સોમારુદ્રા ધારયેથામસુર્યં પ્ર વામિષ્ટયોઽરમશ્નુવન્તુ ।
દમેદમે સપ્ત રત્ના દધાના શં નો ભૂતં દ્વિપદે શં ચતુષ્પદે ॥ ૬.૦૭૪.૦૧
સોમારુદ્રા વિ વૃહતં વિષૂચીમમીવા યા નો ગયમાવિવેશ ।
આરે બાધેથાં નિરૃતિં પરાચૈરસ્મે ભદ્રા સૌશ્રવસાનિ સન્તુ ॥ ૬.૦૭૪.૦૨
સોમારુદ્રા યુવમેતાન્યસ્મે વિશ્વા તનૂષુ ભેષજાનિ ધત્તમ્ ।
અવ સ્યતં મુઞ્ચતં યન્નો અસ્તિ તનૂષુ બદ્ધં કૃતમેનો અસ્મત્ ॥ ૬.૦૭૪.૦૩
તિગ્માયુધૌ તિગ્મહેતી સુશેવૌ સોમારુદ્રાવિહ સુ મૃળતં નઃ ।
પ્ર નો મુઞ્ચતં વરુણસ્ય પાશાદ્ગોપાયતં નઃ સુમનસ્યમાના ॥ ૬.૦૭૪.૦૪

જીમૂતસ્યેવ ભવતિ પ્રતીકં યદ્વર્મી યાતિ સમદામુપસ્થે ।
અનાવિદ્ધયા તન્વા જય ત્વં સ ત્વા વર્મણો મહિમા પિપર્તુ ॥ ૬.૦૭૫.૦૧
ધન્વના ગા ધન્વનાજિં જયેમ ધન્વના તીવ્રાઃ સમદો જયેમ ।
ધનુઃ શત્રોરપકામં કૃણોતિ ધન્વના સર્વાઃ પ્રદિશો જયેમ ॥ ૬.૦૭૫.૦૨
વક્ષ્યન્તીવેદા ગનીગન્તિ કર્ણં પ્રિયં સખાયં પરિષસ્વજાના ।
યોષેવ શિઙ્ક્તે વિતતાધિ ધન્વઞ્જ્યા ઇયં સમને પારયન્તી ॥ ૬.૦૭૫.૦૩
તે આચરન્તી સમનેવ યોષા માતેવ પુત્રં બિભૃતામુપસ્થે ।
અપ શત્રૂન્વિધ્યતાં સંવિદાને આર્ત્ની ઇમે વિષ્ફુરન્તી અમિત્રાન્ ॥ ૬.૦૭૫.૦૪
બહ્વીનાં પિતા બહુરસ્ય પુત્રશ્ચિશ્ચા કૃણોતિ સમનાવગત્ય ।
ઇષુધિઃ સઙ્કાઃ પૃતનાશ્ચ સર્વાઃ પૃષ્ઠે નિનદ્ધો જયતિ પ્રસૂતઃ ॥ ૬.૦૭૫.૦૫
રથે તિષ્ઠન્નયતિ વાજિનઃ પુરો યત્રયત્ર કામયતે સુષારથિઃ ।
અભીશૂનાં મહિમાનં પનાયત મનઃ પશ્ચાદનુ યચ્છન્તિ રશ્મયઃ ॥ ૬.૦૭૫.૦૬
તીવ્રાન્ઘોષાન્કૃણ્વતે વૃષપાણયોઽશ્વા રથેભિઃ સહ વાજયન્તઃ ।
અવક્રામન્તઃ પ્રપદૈરમિત્રાન્ક્ષિણન્તિ શત્રૂઁરનપવ્યયન્તઃ ॥ ૬.૦૭૫.૦૭
રથવાહનં હવિરસ્ય નામ યત્રાયુધં નિહિતમસ્ય વર્મ ।
તત્રા રથમુપ શગ્મં સદેમ વિશ્વાહા વયં સુમનસ્યમાનાઃ ॥ ૬.૦૭૫.૦૮
સ્વાદુષંસદઃ પિતરો વયોધાઃ કૃચ્છ્રેશ્રિતઃ શક્તીવન્તો ગભીરાઃ ।
ચિત્રસેના ઇષુબલા અમૃધ્રાઃ સતોવીરા ઉરવો વ્રાતસાહાઃ ॥ ૬.૦૭૫.૦૯
બ્રાહ્મણાસઃ પિતરઃ સોમ્યાસઃ શિવે નો દ્યાવાપૃથિવી અનેહસા ।

પૂષા નઃ પાતુ દુરિતાદૃતાવૃધો રક્ષા માકિર્નો અઘશંસ ઈશત ॥ ૬.૦૭૫.૧૦
સુપર્ણં વસ્તે મૃગો અસ્યા દન્તો ગોભિઃ સંનદ્ધા પતતિ પ્રસૂતા ।
યત્રા નરઃ સં ચ વિ ચ દ્રવન્તિ તત્રાસ્મભ્યમિષવઃ શર્મ યંસન્ ॥ ૬.૦૭૫.૧૧
ઋજીતે પરિ વૃઙ્ધિ નોઽશ્મા ભવતુ નસ્તનૂઃ ।
સોમો અધિ બ્રવીતુ નોઽદિતિઃ શર્મ યચ્છતુ ॥ ૬.૦૭૫.૧૨
આ જઙ્ઘન્તિ સાન્વેષાં જઘનાઁ ઉપ જિઘ્નતે ।
અશ્વાજનિ પ્રચેતસોઽશ્વાન્સમત્સુ ચોદય ॥ ૬.૦૭૫.૧૩
અહિરિવ ભોગૈઃ પર્યેતિ બાહું જ્યાયા હેતિં પરિબાધમાનઃ ।
હસ્તઘ્નો વિશ્વા વયુનાનિ વિદ્વાન્પુમાન્પુમાંસં પરિ પાતુ વિશ્વતઃ ॥ ૬.૦૭૫.૧૪
આલાક્તા યા રુરુશીર્ષ્ણ્યથો યસ્યા અયો મુખમ્ ।
ઇદં પર્જન્યરેતસ ઇષ્વૈ દેવ્યૈ બૃહન્નમઃ ॥ ૬.૦૭૫.૧૫
અવસૃષ્ટા પરા પત શરવ્યે બ્રહ્મસંશિતે ।
ગચ્છામિત્રાન્પ્ર પદ્યસ્વ મામીષાં કં ચનોચ્છિષઃ ॥ ૬.૦૭૫.૧૬
યત્ર બાણાઃ સમ્પતન્તિ કુમારા વિશિખા ઇવ ।
તત્રા નો બ્રહ્મણસ્પતિરદિતિઃ શર્મ યચ્છતુ વિશ્વાહા શર્મ યચ્છતુ ॥ ૬.૦૭૫.૧૭
મર્માણિ તે વર્મણા છાદયામિ સોમસ્ત્વા રાજામૃતેનાનુ વસ્તામ્ ।
ઉરોર્વરીયો વરુણસ્તે કૃણોતુ જયન્તં ત્વાનુ દેવા મદન્તુ ॥ ૬.૦૭૫.૧૮
યો નઃ સ્વો અરણો યશ્ચ નિષ્ટ્યો જિઘાંસતિ ।
દેવાસ્તં સર્વે ધૂર્વન્તુ બ્રહ્મ વર્મ મમાન્તરમ્ ॥ ૬.૦૭૫.૧૯

Last updated July 2, 2013

Special mention : Initial processing and help by Avinash and Shashi Sathaye,
Avinash Chopde, Shree Devi Kumar, Sunder Hattangadi, John Gardner.
Reprocessed from Original in final form by Detlef Eichler with additional corrections.
See Detlef's site http://www.detlef108.de/Rigvedatm
for other details and formats.

The text is shown with accents (Anudattas, dependent Svaritas,
and independent Svaritas including Kampas). Words are connected (agnimILe).

Ch is doubled as in gachChati according to the rules of Rigveda-Pratishakhya.
At the end of a word m is replaced by Anusvara M if the initial letter of the following word is a labial stop consonant (p, ph, b, bh, m).
Visarga H before sh, Sh or s followed by a voiceless consonant has been restored.

Source : The Aufrecht/van Nooten/Holland (Samhita) version of the Rigveda (http://www.people.fasarvard.edu/ witzel/onlineRVtm).
In this text accented vowels have Udatta or 'independent Svarita' markers.
Kampas are not shown. Words are separated (agnim ILe).
Ch is not doubled as in gaChati. At the end of a word we find m before a following labial stop consonant (p, ph, b, bh, m).
Visarga H before sh, Sh or s followed by a voiceless consonant has been dropped according to a rule of Rigveda-Pratishakhya.

Send corrections to : detlefeichler@googlemail.com, sanskrit@cheerful.com

---

*Rigveda Mandala 6*

pdf was typeset on January 21, 2023

Please send corrections to *sanskrit@cheerful.com*